श्री जिनदत्तसूरिप्राचीन पुस्तकोद्धार फन्ड ( सुरत ) ग्रन्थाङ्क—५९

॥ श्रीजिनाय नमः ॥

श्रीखरतरगच्छालंकार जिनभद्रसूरि शिष्य—सिद्धान्तरुचि वाचकानां शिष्यमुनिसोमगणि विरचितं—

# श्री रणसिंह चरित्रम् ।

( पद्यं )

जैनाचार्य श्रीमज्जिन कृपाचन्द्रसूरीस्वराणां शिष्यरत्नोपाध्यायमुनिसुखसागरोपदेशेन कलकत्ता निवासी बाबू हीरालाल खारड विहितेन द्रव्य साहाय्येन प्रकाशितम् ।

प्रकाशकः—श्रीजिनदत्तसूरि ज्ञानभंडार मु० सुरत

भेट प्र० ५००

वीर सेवा मन्दिर
दिल्ली

★

२२०७६
क्रम संख्या 240.2 सागर
काल नं०
खण्ड

## दो शब्द—

में दान, शील, तप और भावका सुचारुरूपसे प्रभावोत्पादक वर्णन है, जो आपके
: अनेक ज्ञानभण्डार संस्थापक श्रीजिनभद्रसूरिजीके शिष्य सिद्धान्तरुचि, उपाध्यायके
४० में निर्माण किया है, इस ग्रंथके अवलोकनसे ही आपलोगोंकी स्वयं ग्रन्थकार
।

ग्रन्दजी नाहटाने भेजी थी उसीके आधारपर इस ग्रन्थका सम्पादन किया गया है।
सी बाबू हीरालालजी सरस्की दी हुई आर्थिक सहायतासे हो रहा है, आशा है
करें।

सं० २००४ पौ० शु० ११
कलकत्ता।

मुनि मंगल सागर

॥ नमो जिनाय ॥

श्रीजिनभद्रसूरिसिष्य-सिद्धान्तरुचि — वाचकानां, शिष्य मुनिसोमगणि विरचितं—

# * श्रीरणसिंह चरित्रम् *

शुभ कर वर कर केवल—दिनकरकिरणैर्निरस्तमोहबलम् । प्रकटित भुवनोदरगत, जीवाजीवादि भावौघम् ॥ १ ॥

तं जगदीश्वरमेकं, श्रीवीरं सकलकर्मनिर्मुक्तम् । प्रणिपत्यातिशययुतं, वक्ष्ये रणसिंहचरितलवम् ॥ २ ॥

जम्बूद्वीपाभिधेद्वीपे, जम्बूवृक्षोपलक्षिते । अस्ति श्रीभरतक्षेत्रं, दक्षिणादिग्विभूषणम् ॥ ३ ॥

तत्रारिप्राप्तविजयं, विजयाख्यं पुरोत्तमम् । वसुन्धराशिरोरत्नं, रत्नवत्सर्वतोऽद्भुतम् ॥ ४ ॥

यत्र श्रीमज्जिनेन्द्राणां, प्रासादाः संमदप्रदाः । क्षेत्रीणां मोक्षसौख्यानि, यच्छन्तो ध्वजहस्ततः ॥ ५ ॥

प्रायोलोका गतशोका, —श्छेकाः सद्धर्मकर्मसु । दानिनो मानिनो भोग, भोगिनो योगिनोऽनिशम् ॥ ६ ॥

सरसाश्छायया युक्ता, विलसत्फलशालिताः । सदा रामा इवाऽऽरामा, राजन्ते रतिदायकाः ॥ ७ ॥
महेभ्याः स्वर्गिरीयन्ते, यत्र दीप्यत्सुदर्शनाः । कल्याणकमलाभाजः सन्नन्दनमनोरमाः ॥ ८ ॥
विपक्षचटकश्रेणीन्, यस्यासि श्येनकोऽचरत् । दीप्यमानः सुतीक्ष्णास्यो, व्यस्खलद्रमनो भुवि ॥ ९ ॥
राजा विजयसेनाख्यो, राजवत्र व्यराजतः । सच्चकोराक्षिपीयूषं, दक्षजाति प्रमोदकः ॥ १० ॥
तस्यासीदग्रमहिषी, नाम्ना श्रीअजिता जिता । यया सौभाग्यभङ्गीभिः, सावित्री-पार्वतीन्दिराः ॥ ११ ॥
अपरा विजयादेवी, देवीव विजयालया । यां वीक्ष्यानङ्गकान्ताऽपि रूपगर्वं जहात्यहो ! ॥ १२ ॥
संसारसारसौख्यानि, भुञ्जन्ती भूभुजा समम् । लेभे क्रमेण सा गर्भं, शालिः सद्रातनैरदैः ॥ १३ ॥
गतेषु नवमासेषु, सार्द्धाष्टासु दिनेषु च । प्रासूत सा सुतं दिव्यं, पूर्वा सूर्यमिवोत्तमम् ॥ १४ ॥
तदा किञ्चाजिता देव्या, पापिष्टा सूतकारिणी । आदिष्टा पूर्वमेवेति, संचार्य मृतमर्भकम् ॥ १५ ॥
तत्सुतो मार्ययो, जीवंस्तथैव विदधे तया । ततो दुष्टाशया देवी, तं बालं दासिपार्श्वतः ॥ १६ ॥
सुण्डे तृणादिभिच्छिन्ने, बालं निक्षिप्य निर्दयम् । दूरतस्त्याजयामास, यथाऽऽर्त्तो म्रियते स्वयम् ॥ १७ ॥

ततश्च विजयादेव्या, सा विश्राम-विघातिनी। संमानिता धनै रत्नैः कनकैः सूतकारिणी ॥ १८ ॥

तथापि तुच्छचित्तत्वा-दथवा स्त्रीस्वभावतः। क्लेसे च तया-ही एवं, गूढं स्त्रीचरितं यतः॥ १९ ॥

"रविचरियं गहचरियं, ताराचरियं च राहुचरियं च। जाणंति बुद्धिमंता, इत्थीचरियं न जाणंति ॥ २० ॥"

इतश्च विजयपुरा,-सन्ने सुग्रामनामनि। यत्र वास्तव्यलोकोऽस्ति, विभूत्या निर्जितालकः॥ २१ ॥

स्वाज्यप्राज्यदधिक्षीर,-स्वस्वक्षेत्रोत्थधान्यकैः। यो न्यत्करोति सद्रङ्गः-वासिलोककदम्बकान्॥ २२ ॥युग्मम्॥

तृणार्थमन्यदा गच्छन्, करुणामान्द्रमानसः। तत ग्रामवासिकौटुम्बी, सुन्दरः सुन्दरा- कृतिः॥ २३ ॥

रसन्तं विरसं बालं, तृणवल्लितलस्थितम्। सुन्दरं सुभगाकारं, दीप्तिमन्तं ददर्श सः॥ २४ ॥

यथा महानिधिं निःस्वः, संवीक्ष्य करसंपुटे। हृष्ट तुष्टश्च जग्राह, तद्वदेनं स्तनन्धयम्॥ २५ ॥

यत उक्तम्—

अघटित-घटितानि घटयति, सुघटित-घटितानि जर्जरी कुरुते।

विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ॥२६॥

तमादाय निजागारं, समागत्य स सुन्दरः । प्रियाय अर्पयामास, मनोहरमपि स्वयम् ॥ २७ ॥
तामुक्तवांश्चापुत्राभ्यां, वनदेवतया ददे । कल्पद्रुमाङ्कुर इव, पालनीयस्त्वया प्रिये ! ॥ २८ ॥
ताभ्यां हर्षप्रकर्षाभ्यां, चक्रे जन्ममहोत्सवम् । रणसिंहाभिधानं च, तस्य कल्याणवासरे ॥ २९ ॥
धात्रीभिर्लाल्यमानोऽसौ, वर्द्धमानः पदे पदे । कलासु कुशलो जज्ञे, शस्त्रे शास्त्रे विशारदः ॥ ३० ॥
सोऽन्यदा मत्तमातङ्गः—रथाश्वारोहणादिभिः । राजक्रीडाभिरनिशं, क्रीडतिस्म महापथे ॥ ३१ ॥
अथैकदाऽप्याऽवसरं, पुंसा श्रीराज्यमानिना । अवाचि विजयस्याग्रे,-ऽग्रमहिष्य विचेष्टितं ॥ ३२ ॥
तन्मुखान्निखिलं मत्वा, देव्या असममाहसं । वज्रायुधाहत इव, कस्माज्जातो जनेश्वरः ॥ ३३ ॥
दाध्योचेयं महादुष्टा, पापिष्टा कूटसंकुटी ; वंचद्रोहरतासाया, वल्लरीजलसन्निभा ॥ ३४ ॥
चित्ते चिन्तयते याऽन्यद्, रमणे रमते परं । ब्रवीति वचनं चान्यत्, सा कथं ? सुखहेतवे ॥ ३५ ॥
विरक्ता विषवल्लीव, नूनं प्राणापहारिणी । या रक्ता मृतवल्लीव, सर्वाङ्गसुखदायिनी ॥ ३६ ॥
क्षणं मत्ता क्षणं रुष्टा, क्षणं दर्शित-दर्शना । विद्युच्चपल—संचारा, प्रकटं कुटिलालिका ॥ ३७ ॥

दुर्यशः—पटहोवादि, पुत्रमारण—लक्षणः । यया जगत्रये नूनं, तां दृष्ट्वा खिद्यते मनः ॥ ३८ ॥

इत्थं विचिन्तयं स्तस्याः, स्वरूपं पृथिवीपतिः । महावैराग्य—फलदं, चित्तक्षेत्रे प्ररूढवान् ॥ ३९ ॥

भृतं मे राज्यभारेण, भृतं कान्ताकदम्बकैः । भृतं मे गृहवासेन, चतुरङ्ग—बलैः भृतं ॥ ४० ॥

किं चाथ वर्द्धमानोक्तां, संसाराम्भोधितारिणीं । प्रव्रज्यां प्रतिपत्स्येहं, परमानन्ददायिनीं ॥ ४१ ॥

एवं ध्यात्वा निजे चित्ते, ऽभिषिच्य भव्यचामरे । विशुद्धं स्वीयवंशोत्थं, नरं राज्ये नरेश्वरः ॥ ४२ ॥

ददद्दानं सुपात्रेभ्यो, दीनेभ्योऽति विशेषतः । अष्टाहिकामहस्तन्वन्, कुर्वन्निष्क्रमणोत्सवम् ॥ ४३ ॥

राजा विजयसेनाख्यो, विख्यातोऽखिल मण्डले । विजया भार्ययायुक्त,—स्तद्धात् सुजयान्वितः ॥ ४४ ॥

प्राप्तवानाप्तवीरस्य, पादपद्मं षडङ्घ्रिवत् । विज्ञो विज्ञापयामास, ललाट—घटिताञ्जलिः ॥ ४५ ॥

प्रभो ! प्रमादमाधाय, भवात्तारय तारय । दुःखदावानलालीढं, मां परिवारसंयुतम् ॥ ४६ ॥

ततः स्वपद्म हस्तेन, यान पात्रोपमेन भोः! । ततो दिदीक्षे देवेन्द्रः, वर्द्धमानेन तायिना ॥ ४७ ॥

तप्यंस्तपांसि भूयांसि, तीव्राणि दुस्तपान्यहो । प्रोद्दीप्यद्दीप्तिभिर्भानु,—र्भानुवद्भासुरस्तराम् ॥ ४८ ॥

शिक्षयन् द्विविधां शिक्षां, दक्षां दक्ष प्रतिज्ञकः। पापठन् श्रीगुरूपान्ते, आगमं रागगञ्जनम् ॥ ४९ ॥

ध्यानं सध्यानसंलीनं, ध्यायन् कर्मेन्धनानिलम्। गोपयन् गोपवद् गुप्तिं, चतुर्गति—पथावरीम् ॥ ५० ॥

आचरंश्चरिताचारं, निरतीचारमन्वहम्। कतिभिर्दिवसैः प्राप, सोऽवधिज्ञानमुज्ज्वलम् ॥ ५१ ॥

श्रीवीरपादाम्बुजचञ्चुरीको, राजर्षि राजो विजयी व्यहार्षीत्।

पवित्रयन् यो निजपादचारैः,—स्त्रैलोक्य लोकं विरजीचकार ॥ ५२ ॥

इतश्च रणसिंहाख्यो, यौवनं प्राप्तवान् वयः। शृङ्गाररसकासारं, मानिनीमानमर्दनम् ॥ ५३ ॥

अन्यदा तत्पुराऽसन्न, शालिगोधूम धान्ययोः। क्षेत्रधात्रीमुर्वराभां, ररक्ष क्षेत्रपालवत् ॥ ५४ ॥

विजयात्पुर व प्रान्ते, प्रोत्तुङ्गोऽभ्रंलिहोज्ज्वलः। प्रासादः पार्श्वनाथस्य, त्रिजगज्जीवनौषधम् ॥ ५५ ॥

नानादेवासुरेन्द्राणां, विषादार्त्यपनोदकः। पुष्टिस्तत्पुण्यपुण्यस्य, साधूनां शिवसाधकः ॥ ५६ ॥

चिन्तामण्याख्य यक्षोऽस्ति, सेवाकृत्सेवकोत्तमः। पार्श्वाराधक—लोकानां, मनः कामितपूरकः ॥ ५७ ॥

व्याधेर्व्याधिवतां हन्ता, निर्धनानां धनप्रदः। दुःखिनां दुःखलक्षस्य, क्षयकृत्सुखदः सताम् ॥ ५८ ॥

श्रीमतो विजयपुरा—न्निःशेषो धार्मिको जनः। राजादि प्रमुखस्तीर्थ—यात्रा हेतोः समागमत् ॥ ५९ ॥

केचित्स्नात्रं पवित्रं च, सुगन्धिद्रव्यमिश्रितैः। शुद्धोदकैः प्रकुर्वन्ति, तैर्दत्तोऽर्घे जलाञ्जलिः ॥ ६० ॥

कर्पूरपूरमृगनाभिसुकुङ्कुमौघ,द्रव्यैर्विमिश्र मलयोद्भवचन्दनेन।
श्रीभृयते किल जगद्गुरुचारुदेहे, कुर्वन् विलेपनमुदार जनो विलेपः ॥ ६१ ॥

कल्याणाम्बुजपारिजातकुसुमैः रकेतकीपल्लवैः
रक्ताशोक गुलाल वेउललमद्राङ्गय—जाति व्रजैः ॥
चञ्चच्चम्पकमालतीभिरनिशं येऽभ्यर्चयन्ति प्रभुम्।
साम्राज्यं जगतोऽनुभूय शिव मां भुञ्जन्ति ते मानवाः ॥ ६२ ॥

षष्टितंदुल लमत्कलमाह्वयैर्देव जीरगुरुडाख्य शालिभि।
पुञ्जक त्रितयमीशितुः पुरो ये व्यधुः सुगति शालिनस्तके ॥ ६६ ॥

पार्श्वनाथ पुरतो ननृतुर्यके हावभावनिवहैश्चतुराशयाः।
अंगहारकरणावलिपूर्वं, स्वर्गि सुन्दरिगणास्तदग्रतः ॥ ६४ ॥

अश्वसेननृपपुत्र, पार्श्वयोर्दीप्रदीपकमणिं वितेनिरे। केवलोत्तमतमं सुकेवलं, ज्ञानमापुरमलं ततः शिवम् ॥ ६५ ॥

किंनरी वेणु वीणा समान स्वनैर्मञ्जुलोदार सारैर्गुणैर्गुम्फितम्।
भावतो गीत गानं व्यधुर्ये नरास्ते, परत्राप्सरोभिस्तुतास्युर्नराः ॥ ६६ ॥

सर्वोत्कृष्टं सारभूतं रसाढ्यं, पार्श्वस्याग्रे सत्फलं केचनार्याः।
ढौकन्ते ते सिद्धसीमंतितीनां, वक्षोजाग्रे, लोलुठत्येव शश्वत् ॥ ६७ ॥

नैवेद्यं निरवद्यं मोदकलपन् श्रियावरं सततं। ढौकन्ते केऽपि मुदा, मोक्षपथप्रस्थितं पादम् ॥ ६८ ॥

एवं पार्श्वार्चनं यात्रा,—ऽऽगत्य लोकाः प्रकुर्वते। तदधिष्ठायको यक्षो, दत्ते स्वैरं मनोमतम् ॥ ६९ ॥

अन्यदा रणसिंहोऽपि, क्षेत्र खेदापनुत्तये। क्षेत्रात्तीर्थं समागमीत, श्रान्तश्चैत्यतरोस्तले ॥ ७० ॥

देवानालोकयन् याव,—च्चारणश्रमणोत्तमौ। साधू राजा जिनन्नन्तुं, तावत्खेऽध्वनि संगतौ ॥ ७१ ॥

तपस्तेजोदितध्वान्तौ, सूर्याचन्द्रमसाविव। दर्शनानन्दजनकौ, निःसीम द्युतिसुन्दरौ ॥७२॥युग्मम्॥

नत्वा स्तुत्वा पूजयित्वा, भावपूजाभिरादरात। यावद्यातस्तदा भक्त्या, रणसिंहोऽभ्यवंदत ॥ ७३ ॥

तस्याङ्गं राजचिह्नान्य—, द्राष्टां लक्षणविद्वरौ। ततो निविश्य भूपीठे, चक्राते धर्मदेशनाम् ॥ ७४ ॥
रणसिंहोऽपि तद्वक्त्र,—लोचना ज्ञानलोचनः। विनयावनतोऽश्रौषी—ल्ललाटे घटिताञ्जलिः ॥ ७५ ॥
दुर्लभं दशदृष्टान्तै—,र्मानुषं जन्म जन्मिनाम्। ततोऽपि चार्यदेशादि, सत्कुलं चाक्षपाटवं ॥ ७६ ॥
दुर्लभः साधु संयोगो—ऽर्हद्धर्मश्रवणं ततः। दान-शील-तपो-भाव,—भेदात्तच्चतुर्विधम् ॥ ७७ ॥
तत्र पञ्चविधं दानं, निदानं मुक्ति सम्पदः। स्वपरोपकृतौ हेतुः, प्रत्यपादि जिनोत्तमैः ॥ ७८ ॥
शीलं सर्वगुणाधानं, शीलं परमभूषणम्। दुःखागोन्मूलने कीलं, शीलं सद्गति—साधनम् ॥ ७९ ॥
शीलपालनतोऽनेके, राजानो नारदादयः। सिद्धि सीमन्तिनी वक्षः,—स्थले हारंति नित्यशः ॥ ८० ॥
दुष्कर्माचल—कुलिशं, मनोमल—विशोधनम्। मन्त्रतन्त्रौषधी मुक्तं, कार्मणं निर्वृतिश्रियः ॥ ८१ ॥
दुर्जयं करणग्राम, नागोग्रविषगारुडम्। सर्वलब्धिलतामूलं, तपो द्वादशधा स्मृतं ॥ ८२ ॥ युग्मम् ॥
वितीर्णं प्रचुरं वित्तं, तप्तं तीव्रं तपोघनम्। बहुधा शीलितं शीलं, निष्फलं भावनोज्झितम् ॥ ८३ ॥
तिर्यञ्चोऽपि मृगव्याला, भावनातो दिवं गताः। सर्वेभ्यो भावनोत्कृष्टा, प्रख्याता प्रथिताऽर्हतैः ॥८४॥युग्मम्॥

तथा धर्मं द्विधा प्राहु,—रर्हन्तोऽर्हपतिप्रभाः। सर्वतो विरतैरेकं, देशतोविरतैः परम् ॥ ८५ ॥

तयोराद्यं सुसाधूनां, चञ्चत्पञ्च—व्रतात्मकम्। सम्यक्तान्वित पञ्चाणु,—व्रत त्रिगुण सद्व्रतम् ॥ ८६ ॥

चतुःशिक्षाव्रतोपेतं, श्राद्धधर्मं द्वितीयकम्। शाश्वतानन्द दातार—, मन्यं चानुक्रमेण हि ॥ ८७ ॥

धर्माद्राज्यं प्राज्यमारोमारोग्य मायु,—र्दिव्यं रूपं रम्यरामाविलासः।

बुद्धं वृद्धिः सर्वकार्येषु सिद्धि, सम्पत्सर्वा ह्यत्र पारत्र्यसिद्धिः ॥ ८८ ॥

इत्येवं देशना प्रान्ते, सिंहः सिंहपराक्रमः। भावितः साधु धुर्याभ्यां, सुधादेशीयया गिरा ॥ ८९ ॥

प्रतिपद्यस्व वत्स! त्वं, जिनधर्मं धनावहम्। सिंहोऽवादीदहं कर्तुं, पारयामि न साम्प्रतम् ॥ ९० ॥

सामायकादि षड्विध, —मदनुष्ठाने ह्यवश्यकर्त्तव्यं। नाहमलं त्रिकदशकैः—शुद्धं जिनपूजने शिवदे ॥ ९१ ॥

न तथा तपो विधाने, सिद्धान्तविचारणेऽपि नो बुद्धिः। देवे गुरौ न तत्त्वे, रत्नत्रयपालने शक्तिः ॥ ९२ ॥

पुनरप्यभाणि मुनिना, जिनपूजं कापि कामितं कुर्याः। तस्मात्स्वकीय भक्त्या,—दखण्ड पिण्डी प्रदातव्या ॥ ९३ ॥

एवं नियमविशेषं भूयाः, सविशेष निखिल लाभकरः। पूजामनुभोक्तव्यं, सद्यः सफलो हि दृढ़नियमः ॥ ९४ ॥

एवं त्रिकरणशुध्या, ङ्गीकृत्याभिग्रहं तदा। हर्षोत्कर्षेण चित्तेन तौ सिंहेनाभिवन्दितौ ॥ ९५ ॥
ततो लब्धिप्रयोगेण, तौ गतौ गगनाङ्गणं। पालयन्नियमं सिंहः, सिंहवत् क्षेत्र मागमत् ॥ ९६ ॥
कूर—करम्ब—प्रमुखं, नैवेद्यं पार्श्वनाथवरभवने। प्रतिदिवसं प्रतिदिवसं, वितरति भक्त्यायुतः सिंहः ॥ ९७ ॥
चिन्तामण्याख्य—यक्षेण, तत्परोक्षार्थमान्यदा। दर्शयामास हर्यक्षः, किशोरपिङ्गलाक्षकः ॥ ९८ ॥
साक्षान्महिषध्वजव,—द्दुर्धृक्षोद्युग्रकेसरः। लांगूलास्फालितक्षोणि,—गुञ्जद्गुञ्जारवोद्वरः ॥ ९९ ॥
तस्याऽभिग्रह भङ्गाय, पार्श्वप्रासादमण्डपे। श्रीमण्डप इवात्यन्तं, सश्रीकेलोकतारके ॥१००॥
एवं वितर्कयामास, तं वीक्ष्य निजचेतसि। सिंहो हि एष क एकाकी, रणसिंहोऽस्म्यहं पुनः ॥१०१॥
तत्करिष्यत्यसौ किं मे, हक्कित्वेति खराक्षरैः। आक्रम्य पादघातेन, पुरो व्रजति यावता ॥१०२॥
तावता काकनाशं स, प्रणणाश मृगाधिपः। भृशं गवेश्यमाणोऽपि, नादृश्यत कुत्रचित् ॥१०३॥
कृत्वा नैवेद्य सत्पूजां, क्षेत्रमागत्य यावता। भोक्तुं ह्युपोविशत्तावत, कुतोऽप्यागान्मुनिद्वयम् ॥१०४॥
लोचनानन्द कृद्बालं, ददद्धर्माशिषं पुरः। निरीहं निरहङ्कारं, ददर्श भाग्ययोगतः ॥१०५॥ युग्मम् ॥

प्रतिलाभ्य मुनी यावद्, भक्ताद्यैर्भक्तिपूर्वकम्। उपविष्टः पुनर्भोक्तुं,तावत्पुनरुपागमत् ॥१०६॥
अध्वश्रान्तं क्लिन्नगात्रं, जरया जर्जरीकृतम्। साधुयुग्मं विहायार्योभक्तं भक्तिभरान्वितः ॥१०७॥
हृदि दध्यौ गते तस्मि,—स्तौ चारणमुनीश्वरौ। मोहध्वान्तदिवानाथौ,क्वापि पश्यामि साम्प्रतम् ॥१०८॥
भक्तशेषं विशेषेण. ताभ्यां यच्छामि तर्ह्यहम्। फलं लामि दुरापस्य हं हो ! मानवजन्मनः ॥१०९॥
तृतीयवारमपि श्रद्धा,—भरैः सर्वाशनं मुनेः। ददे अतः सुकृतव्यूहः, सिंहेन समुपापार्ज्यत ॥११०॥

यतः प्रोक्तम्—

सर्वोत्तमं पात्रमधीश्वरौघः, पात्रं द्वितीयं मुनयो गुणाढ्याः।
तृतीयकं पात्रमणुव्रतस्था, स्तुर्यं तु सम्यक्त्वगुणैकधर्त्ता ॥१११॥
चत्वार्येतानि पात्राणि, प्रोक्तानि परमेश्वरैः। तेषां सद्दानश्रद्धाने, अर्हच्छासन भासनम् ॥११२॥
धर्माराधनसामग्री, शुद्धो भावः शुभोदयः। पात्रयोगो महत्पुण्यो,—दयैः प्राणिभिराप्यते ॥११३॥
स्थैर्यं संवीक्ष्य निस्सीमं, तस्याभिग्रह संग्रहे। प्रत्यक्षीभूय यक्षेशश्चलत्कुण्डलयामलः ॥११४॥

सिंहं प्रत्याह भो भद्र !, याचस्व स्वमनीषितम्। सोऽवादीत् दूर्लभं लोके, दर्शनं प्रापि तन्मया ॥११५॥
येनाधर्माम्बुधेः शोषो, येनारोधि गतिद्वयी। येनापवर्गकामिन्यः संगे दूतायिता ध्रुवम् ॥११६॥ युग्मम् ॥
तथापि किञ्चित् याचस्व, न मोघं देवदर्शनम्। तद्यर्थकिरणैश्छाद्वि, निःस्वभूछाय मञ्चयम् ॥११७॥
इत्युक्ते सति यक्षणोक्तं श्रीकनकपत्तने। कनकशेखरेशस्य, सुता कनकवत्यसि ॥ ११८ ॥
तस्याः स्वयंबरं श्रुत्वा, गन्तव्यं झटिति त्वया। शङ्का काऽपि न कर्त्तव्या, त्वया भक्तया वशीकृतः ॥ ११९ ॥
यत्र कुत्रापि साहाय्यं, करिष्यामि स्मृतस्तत्र। एवमुक्त्वा स यक्षोऽपि, दिव्यकस्मात्तिरोदधे ॥ १२० ॥
तथेति रणसिंहोऽपि, ततोऽगान्निजवेश्मनि। सोऽपि यक्षेश्वरप्रोक्तं, वृत्तान्तमवदत्प्रियाम् ॥ १२१ ॥
अन्तरुल्लसितानन्दा, साऽब्रवीद्दयितं प्रति। फली धर्मद्रुमो ह्यत्र, चित्तोर्व्यां रोपितस्त्वया ॥ १२२ ॥
अश्रौषीत्कतिभिर्घस्रैः, स्वयंवरणमण्डपम्। आरब्धं कनकेशेन, सुताया जनताऽऽननात् ॥ १२३ ॥
प्रतिक्ष्मापं प्रतिक्ष्मापं, दूतान् प्रेक्ष्य क्षमाभुजा। आकारिताः समे भूपा—अश्विनीकुमरोपमाः ॥ १२४ युग्मम् ॥
संयोजितोज्ज्वललघु,—महोक्षयुगलस्तदा। सिंहोऽपि लाङ्ग-लारूढः, पर्शुपाणिर्मदोद्धुरः ॥ १२५ ॥

प्रतस्थे विशब्दस्थामा, चित्रयंश्चतुरान्नरान् । क्रमेण प्राप कनक—पुरं सुरपुरोपमम् ॥ १२६ ॥
तत्राद्राक्षीत्सुरेन्द्रस्य, क्रीडास्थानमिवाद्भुतम् । दीव्यद्वर्गणाकीर्णं, श्रीमद्यंत्रमण्डपम् ॥ १२७ ॥
चञ्चच्चन्द्रोदयोद्द्योति,—मुक्तामालाकरालितम् । मञ्चातिमञ्चकलितं, नानासिंहासनान्वितम् ॥ १२८ ॥
स्थाने स्थाने च विन्यस्त,—मौक्तिकस्वस्तिकाङ्कितम् । कर्कतनपुष्पराग—रत्नैर्मण्डितभूतलम् ॥ १२९ ॥
इन्द्रकीलमिवोत्तुङ्गं, वरस्तम्भशतोच्छ्रितम् । द्वारे द्वारे स्वर्णकुम्भो—द्भासितं परितोध्वजम् ॥ १३० ॥
पञ्चवर्णसुमोद्दाम,—दामवन्दनमालिकम् । तोरणश्रेणिभी रम्य—मङ्गुलीदत्तदुर्दरम् ॥ १३१ ॥
स्वर्णसिंहासनासीनं, विस्फुरद्राजमण्डलम् । हाराद्धहारत्रिसर,—केयूराभरणोद्धुरम् ॥ १३२ ॥
वराङ्ग रङ्गन्मुकुटं, सद्भालोद्यद्विशेषकम् । बिभ्राणं दिव्यनेपथ्यं, पाणिनृत्यत्पयोरुहम् ॥ १३३ ॥सप्तभिः कुलकम् ।
इत्थं श्रीमण्डपं वीक्ष्य, प्रदध्याविति चेतसि । किं वा सुरपतेः स्थानं ?, किं वा श्रीपतिमन्दिरम् ? ॥ १३४ ॥
पद्माकेलीगृहं किं वा ?, किं वा तीर्थकृतां सभा ? । इत्याद्यनल्पसंकल्प,—जालैराकुलितोऽभवत् ॥ १३५ ॥
कौतुकार्थी तदा प्रोढो, हलारूढो व्यलोकयत् । रणसिंहोऽपि सकलं, विचित्रं राजमण्डलम् ॥ १३६ ॥

अदर्शिदर्शनातीत, रूपलावण्यसम्पदा । हस्तन्यस्तप्रशस्तश्री,—वरमाला महाशया ॥ १३७ ॥
श्वेतवासाः सशृङ्गारा, तदा कनकवत्यहो ! । मोहयन्ती जगच्चित्तं, लक्ष्मीव पुरुषोत्तमम् ॥ १३८ ॥
या दीपिकेव भूपानां, प्रकाशं कुर्वती पुरः । पश्चाद्वितन्वती ध्वान्तं, चङ्क्रमन्ती नृपाग्रतः ॥ १३९ ॥
निश्शेषक्षितिपालानां, नामवंशावलीविदाम् । प्रतीहारीं पुरस्कृत्य, विज्ञातबिरुदावलीम् ॥ १४० ॥
यावद्भूमीभृतां कण्ठे, नाक्षिपद्वरमालिकाम् । तावत् व्योमविलक्षास्यां, प्रेच्छयान्ते ते परस्परम् ॥ १४१ ॥
साऽपि श्यामा क्षणं प्रेक्ष्य, मुक्त्वा राजन्यकं तदा । यत्र हालिकसिंहोऽस्ति, प्राचलत्तं प्रतित्वरा ॥ १४२ ॥
सोत्कण्ठं साऽक्षिपत्कण्ठे, वरमालां वरानना । जगज्जनामोददात्रीं, राज्यलक्ष्मीमिवाद्भुताम् ॥ १४३ ॥
क्रोधाध्माता रक्तनेत्रा—भृकुटी भीषणाननाः । श्रीशूरसेनप्रमुखाः, प्रजल्पन्ति परस्परम् ॥ १४४ ॥
किमेषा कुग्रहग्रस्ता ?, किं मूढाऽऽरूढविभ्रमा ? । राजचक्रं परित्यज्य, हालिकं स्त्रं वृणोति या ॥ १४५ ॥
यदि श्रीकनकेशस्य, कुलहीनोऽपि हालिकः । अभीष्टः समभूदन्ये, राजानो मीलिताः कथं ? ॥ १४६ ॥
अथ श्रीकनकं प्राचुः, कम्प्राङ्गाः क्षितिपाः पुनः । आकार्यैवं पराभूता, सभाध्यक्षं त्रिगोपिताः ॥ १४७ ॥

मूर्खमुख्येन किन्त्वेत–दाजन्मप्रभृति त्वया। प्राणापहारकं वैरं, सर्वैः-सह समर्जितम् ॥ १४८ ॥
भूभृत्सु सत्स्वयं शीरी, कन्यां लात्वा क्व यास्यति ?। यमातिथिं विधायैनं, ग्रहीष्यामो वयं कनीम् ॥ १४९ ॥
तदा च चण्ड सिंहेन, प्रेरिताः सुरभूधवाः। स्वबुद्ध्या क्षिपिता माला, न तु ताताऽऽज्ञया तया ॥ १५० ॥
तत्कथां मूलतो वक्तुं, श्रीकनकेश्वरं प्रति। दूतोऽथ प्रेष्यते दक्षो, मेधावी वाक्पटुः खलु ॥ १५१ ॥
कथाप्यते पुनस्त्वेवं, त्वत्पुत्र्या मूढभावतः। स्वकुलानुचितं चक्रे, लोकहासः स्फुटोऽभवत् ॥ १५२ ॥
पुनः स्वयंवरं कृत्वा, निखिलेष्वपि राजसु। मालाक्षेपेण हे कन्ये ?, मनोऽभीष्टं वरं वृणु ॥ १५३ ॥
नो चेत्संग्राम सामग्रीं, कुरुष्वेति ततो नृपः। गत्वा तेनाखिलं तस्मै, नमस्कृत्य निवेदितम् ॥ १५४ ॥
राज्ञाऽवादि त्वया दूत ?, गत्वा वाच्यं नृपाग्रतः। नास्त्यत्र दोषलेशो मे, पुत्र्या ह्येतत्स्वयं कृतम् ॥ १५५ ॥
अथ चेत्पुनरप्येतत्, कार्यते वरमण्डपः। अकृत्यादत्यकृत्येना,-ऽयशस्तरं नदत्यहो ॥ १५६ ॥
पुत्र्या वृतः प्रमाणं मे, इति श्रुत्वाऽन्यभूधवाः। वज्राहता इवपेतु,-रमर्षोच्छ्वसिताः पुनः ॥ १५७ ॥
अथ ते भूभुजः प्रष्टुं, प्रवृत्ता दुष्टचेतसः। रे रे हालिक ! पापात्मन् !, किं कुलं ते ? प्रकाश्यताम् ॥ १५८ ॥

हालिकः प्राह भोभूपाः ! कुलप्रश्नस्य साम्प्रतम् । न चैवावसरः कोऽपि, प्रोक्तोऽथ प्रत्ययोऽपि न ॥ १५९ ॥
अथाऽऽहवव्यूह एव, कुलाद्याविःकरिष्यति । यथोदयो दिनेशस्य, ज्ञापयत्यपरः कथम् ? ॥ १६० ॥
प्रवृत्ता लब्धचैतन्या,–योद्धारो योद्धुमाहवे । मुष्टामुष्टि दण्डादण्डि, खड्गाखड्गि तथैव च ॥ १६१ ॥
तत्पक्षपातिनो ये तु, हन्तव्यास्तेऽपि निश्चितम् । विशेषतस्तं हलिनं, तमुद्दिश्याभिजग्मिरे ॥ १६२ ॥
स्मृतेष्टदेवः सिंहोऽपि, सोत्साहः समभूद् युधि । मन्यमानस्तृणानीव, राजचक्राणि चेतसि ॥ १६३ ॥
भल्लत्रावल्लसेल्लौघ,—बाणनाराचमुद्गरैः । ते निघ्नन्ति प्रयत्नेन, तस्याङ्गं नो लगत्यहो ! ॥ १६४ ॥
यक्षेण कृतसानिध्यः, सोऽप्यधाविष्ट तान् प्रति । दिशोदिशं प्रणेशुस्ते, लकुटाहतकाकवत् ॥ १६५ ॥
वज्रपाणिरिवाजेयः, पर्शुपाणिर्मदोद्धुरः । एकाक्यप्यहितैः सिंहो, लक्ष्यते लक्षरूपभृत् ॥ १६६ ॥
वैरिवर्गप्रयुक्तानि, दुर्द्धराण्यपि तं प्रति । विद्यायुक्तान्यमोघानि, दिव्यशस्त्राणि तत्पुरः ॥ १६७ ॥
तूलतुल्यानि सर्वाणि, यज्ञिरे यक्षशक्तितः । सिंहप्रयुक्तमस्त्रैकं, पर्श्वाख्यं लक्षघातकम् ॥ १६८ ॥
प्रचण्ड-चण्डसिंहादीन्, ज्वलज्ज्वलन संनिभान् । वातेरितरजांसीवा--ऽशीशमत्स हलाम्बुदैः ॥ १६९ ॥

रणे श्रीरणसिंहेन, सिंहेनेव तरस्विना। मदोत्कटाऽखिलक्ष्मापा,—स्त्रासिता मार्गवत्तदा ॥ १७० ॥

तादृशं साहसं तस्य, तादृशं च पराक्रमम्। अद्भुतं चरितं वीक्ष्य, विस्मितः कनकेश्वरः ॥ १७१ ॥

देवो वा दानवो वा किमु रतिरमणः ? किं कुबेरो नलो वा ?,
किं वा विद्याधरोऽसौ ? किमु पवनसुतः ? किं नरो वा हरो वा ?
किं यक्षो राक्षसो वा ? त्रिदशपतिरिपुर्मानवो वा गुहो वा ?,
युद्धक्रीडां प्रकर्तुं दशरथतनयो रावणो वा रणाग्रे ? ॥ १७२ ॥

ततश्च शूरसेनाद्याः, प्रजल्पन्ति परस्परम्। प्रणष्य: कुत्र यास्याम,—एतस्मादग्रतो वयम् ॥ १७३ ॥

शून्यभेद्यमपि ध्वान्तं, जगदालोक नाशनम्। उदयाचलचूलायां, प्राप्तेऽर्के कुत्र तिष्ठति ॥ १७४ ॥

ततस्तस्यैव पादाब्जं, शरणी क्रियते यदि। सुखेन स्थीयते तर्हि, सराज्यधनबन्धुभिः ॥ १७५ ॥

सर्वोर्वीशा विमृश्यैवं, प्रणेमुस्तत्पदाम्बुजम्। एवं विज्ञपयामासु,—रक्ष रक्ष भयात् प्रभो ! ॥ १७६ ॥

स्वामिन्नज्ञानभावेन, मानाद्वाऽस्मद्विचेष्टिमम्। कृत्वा प्रसादं तत्सर्वं, क्षन्तव्यं क्षेमकारिणा ॥ १७७ ॥

आकृत्या शौर्यवृत्त्या च, ज्ञात्वा जातिकुलादिकम् । चण्डसूरादयः सर्वे, जहृषुः कनकेश्वराः ॥ १७८ ॥
तथापि ज्ञीप्सुना राज्ञा, कनकेन कुलादिकम् । दिवि भोगस्तथा चक्रे, यथा यक्षः प्रकट्यभूत् ॥ १७९ ॥
तेन सिंह कथा प्रोक्ता, सर्वा श्रीकनकेशितुः । आजन्मानो यत्र यावत् समानायि मया विभो ! ॥ १८० ॥
विख्यातोऽयं सुतः श्रीमान्, विजयाविजयसेनयोः । न हालिको ऽजयादेव्या, चेष्टितं च प्रकाशितम् ॥ १८१ ॥
विजया-विजयसेन—राडभ्यां पुत्रवियोगतः । जात वैराग्यरङ्गाभ्यां, जगृहे व्रतमुत्तमम् ॥ १८२ ॥
इत्यादि राजलोकानां, प्रत्यक्षं च प्रकाश्य ताम् । आमूलचूलतो वार्त्तां, यक्षराजस्तिरोदधे ॥ १८३ ॥
ततः समक्षं लोकानां, सूर सेनादिभूभृताम् । चित्तचमत्कार करं, गीतवाद्यजयोदितम् ॥ १८४ ॥
शुभेऽह्नि शुभलग्ने च, तयोर्विवाहमङ्गलम् । समृद्ध्या कारयामास, राजा कनकशेखरः ॥ १८५ ॥ युग्मम् ।
सुवर्ण प्रत्न रत्नाश्व,-मत्तमातङ्ग सम्पदा । राज्यार्द्धं च ददौ तस्मै, प्रस्तावे पाणि पीडने ॥ १८६ ॥
तदा च सर्वे भूशक्रा,- स्तस्य राज्याभिषेचनम् । सुरेन्द्रस्येव देवौघा,---हर्षोत्कर्षाद्वितेनिरे ॥ १८७ ॥
अथातः परमस्माकं, त्रायको नायको भवान् । शिरोमणिरिवाज्ञां ते, वहामो मूर्द्धिन देववत् ॥ १८८ ॥

दिव्यालङ्कार शृङ्गार,—हाराश्वगजराजिभिः । राज्ञा श्रीरणसिंहेन, सर्वे सम्मानिता नृपाः ॥ १८९ ॥

श्वशुरेणापि संमान्य, विसृष्टास्ते नराधिपाः । रणसिंहाज्ञया युक्ताः, स्वस्वस्थानमधिश्रिताः ॥ १९० ॥

सिंहोऽपि कनकवत्या, सार्द्धं वैषयिकं सुखम् । निस्सीममुपभुञ्जानः, सुरेन्द्रो रम्भया यथा ॥ १९१ ॥

उचितानुचितज्ञोऽसौ, श्वशुरप्रत्तनीवृति । रामवन्न्यायधर्मेण, प्राज्यं राज्यमपालयत् ॥ १९२ ॥

वर्जितानार्य सञ्चारं, नयावर्जितसत्प्रजम् । शक्तित्रय समायुक्तं, पापवृत्तिपराङ्मुखम् ॥ १९३ ॥युग्मम् ॥

सुन्दरं सुन्दराकारं, समाकार्यैकपुंकम् । राज्यतृप्तिकरं चक्रे, कृतज्ञो रणसिंहराट् ॥ १९४ ॥

अथ सोमापुरीशस्य, श्रीपुरुषोत्तमेशितुः । रत्नानर्घ्या रत्नवती, पुत्र्यस्ति रतिसंनिभा ॥ १९५ ॥

तया कनकवत्या हि, विवाहाश्चर्यमद्भुतम् । प्रसिद्धं सिद्धलोकेषु, किं पुनर्भूचरेष्वहो ! ॥ १९६ ॥

अथात्रि गुणवत्या हि, ततः सिंहेऽनुरागधीः । प्रोल्ललासतरां तस्या,—श्चन्द्रंदृष्ट्वेव सागरः ॥ १९७ ॥

तच्चित्तज्ञेन भूपेन, पुत्र्याः प्रियचिकीर्षुणा । सिंहानयननिमित्तं, प्रेषिता आप्तपूरुषाः ॥ १९८ ॥

रत्नवत्या विवाहं हि, विधाय त्वं प्रसीद नः । इतीशशिष्टि मादाय, गत्वा सिंहो न्यवेदि तैः ॥ १९९ ॥

संमान्य तान्नराधीशः, प्रत्युत्तरमणुत्तरम् । ददावेतत्समं मन्ता, श्रीमान् कनकशेखरः ॥ २०० ॥
शिक्षाशिषां गृहीत्वा ते, सिंहमानम्य निर्ययुः । प्रापुः कनकभूशक्रं, स्वस्वाम्यर्थ प्रसाधकाः ॥ २०१ ॥
कृत्वा ज्योत्कारमीशस्य, सुखासनमधिश्रिताः । श्रीपुरुषोत्तमादिष्टं, संदेशं ते शशंसिरे ॥ २०२ ॥
ततः कनकराजेन, प्रोक्तं शृणुत मद्वचः । ममापि भागिनेयी सा, तन्मत्कार्यमिदं ध्रुवम ॥ २०३ ॥
तस्या विवाहमाङ्गल्यं, मया कार्यं विशेषतः । ततः श्रीरणसिंहाय, राजा कनकशेखरः ॥ २०४ ॥
प्राहिणोद्वर्यमचिवान्, गत्वा ते सिंहभूभुजम । नत्वा विज्ञपयामासु,---राज्ञादिष्टं सविस्तरम ॥ २०५ ॥
ततः सिंहोऽपि तैः सार्द्धं प्रतस्थे गुरुऋद्धिभिः । अविच्छिन्नप्रयाणेन, पाडलीखण्डपत्तने ॥ २०६ ॥
सोमापुर्याश्चान्तराले, चतुरङ्ग चमूयुतः । कृतसैन्यनिवेशोऽस्था,—द्धर्मकर्मणि कर्मठः ॥ २०७ ॥
रम्यारामे च तद्वारि,—चिन्तामणिसुरोत्तमः । उत्तुङ्ग चङ्ग चैत्यस्थ,—श्चिन्तातीतप्रदो जिनः ॥ २०८ ॥
तं नन्तुं नीतिविन्नेता, प्राप्तपूजोपहारकः । संचचार परीवार,—सारजुष्टोऽन्तरालयम् ॥ २०९ ॥
नमस्कृत्य त्रिधा भक्त्या, चिन्तामण्याह्वयं मुदा । चित्रीयन् यावदागत्य, मत्तवारणमाश्रितः ॥ २१० ॥

तावत्सुलक्षणं तस्य, दक्षिणाक्षमपोस्फुरीत । तदाऽमन्यत कोऽप्यत्र, मिलिष्यति मम प्रियः ॥ २११ ॥
यक्षराजप्रसादेन, किं किं न स्यात्समी हितम् ? । प्राग्जन्मार्जितपुण्यस्या,--थवा मे सत्फलं समम ॥ २१२ ॥
इतः पाडलिखण्डस्य, स्वामी कनकसेनराट् । तत्सुता कमलवन्यासीत, मल्लावण्य गुणालया ॥ २१३ ॥
पञ्चवर्णसुगन्धीनि, पुष्पाण्यादाय सा तदा । दासी सुमङ्गलाजुष्टा, समागाद् यक्षमर्चितुम् ॥ २१४ ॥
कुमारो नेत्रपत्रेण, तां विलोक्य व्यचिन्तयत् । किं लक्ष्मीः ? पार्वती किं वा ?, किं वा सरस्वती सती ? ॥ २१५ ॥
तदङ्गेऽनङ्ग बाणा हि, नाभिन्दन् कोमलेमले । अस्याः कटाक्षबाणास्तु, भेदं वज्राशये ययुः ॥ २१६ ॥
असावस्मन्मान मत्त,---मतङ्गजनियन्त्रणे । वारीयत्यथ विषयाऽहेर्नागदमनीयति ॥ २१७ ॥
कथञ्चित्प्रेक्षितो दिष्टया, कुमारः शिष्टया तया । मानव्यपि विलोक्यैनं, पिबन्त्यनिमिषाऽभवत ॥ २१८ ॥
परस्परानुरागेणा,--नुविद्धौ तौ बभूवतुः । क्षीरनीरसमस्नेहः, प्रादुर्भूतस्तदा तयोः ॥ २१९ ॥
ततोऽर्चयित्वा त यक्षं, प्रार्थयामास साञ्जसम । नान्यं कान्तं समीयेऽहं, तद्द्वारस्थं नरं विना ॥ २२० ॥
मयापि पूर्वमेतस्य, कन्या सम्पत समर्पिते । वरोऽस्तु तेऽप्यसौ यक्ष,--इति तस्यै वरं ददौ ॥ २२१ ॥

ओमिति प्रतिपद्याथ, साऽपि लोचनरज्जुभिः । गाढं नियन्त्र्य प्रमोद यं, प्रेक्ष्यमाणा मुहुर्मुहुः ॥ २२२ ॥

कारयित्वा तथाऽऽलापं, पटुचेष्टया परस्परम । ज्ञात्वा नामादिकं सर्वं, जगाम निजमन्दिरम् ॥ २२३ ॥

तदादि रणसिंहोऽपि, परीवार युतस्ततः । चिन्तामणेश्च भवनं, शून्यं जानाति तां विना ॥ २२४ ॥

द्वितीय दिवसेऽप्येत्य, वीणां वादयति स्वयम । कच्छपीं भारती यद्व,--द्दं व दानवमोहिनीम् ॥ २२५ ॥

सिंहोऽपि च तयाऽऽकृष्टो, यक्षभक्तिं विधाय च । तदैकाग्र्यमनास्तस्थौ, प्राग्दिनाङ्गीकृतासने ॥ २२६ ॥

तथैवाद्यादि सा कृत्वा, न्यवर्तत तदग्रतः । सरागाक्षपरिक्षेपा,--ज्ज्ञापितान्तर्गताशया ॥ २२७ ॥

यतः—

आकारैरिङ्गितैर्गत्या, चेष्टया भाषणेन च । नेत्रवक्त्रविकारैश्च, ज्ञायतेऽन्तर्गतं मनः ॥ २२८ ॥

गृहमेत्य तयाऽचिन्ति, तदेकध्यानचेतसा । अयमेव वरो मेऽस्तु, स्वहृत्सन्तोषपोषकृत् ॥ २२९ ॥

नो चेत्पदुज्ज्वलज्ज्वाला,--ज्वलने प्रविशाम्यहम । अथवा जीवितव्याशां, त्यजामि विषभक्षणात ॥ २३० ॥

ततश्चावासमापन्नं, प्रस्थानाभिमुखं नृपम । तं पुरुषोत्तमो मत्वा, तत्प्रधानैर्नरैस्तदा ॥ २३१ ॥

विज्ञप्तोऽद्यापि भूभर्त्रा, विलम्बः क्रियते कथम ? । ततोऽभाणीन्नृपो ह्यत्र, किञ्चिन्मेऽस्तिप्रयोजनम् ॥ २३१ ॥
तावद् भो ! गच्छत स्वच्छ,--चित्तास्थानमविघ्नतः । ममेप्सिते च संजाते; पुनर्यावि दुपैम्यहम ॥ २३२ ॥

इतश्च—

तत्रास्ति भीमभूपालो, भीम इव पराक्रमी । कमलसेनभूपस्य, सेवां कर्त्तुं समागमत् ॥ २३४ ॥
उद्वोढुं कमलवतीं, कनीं सोऽपि समीहते । तद्धात्रीं पुष्पताम्बूल,-वस्त्रालङ्कारभूषणैः ॥ २३५ ॥
आवर्जयति सोऽत्यन्तं, विविधैस्तूपचारकैः । साऽप्यथावसरं प्राप्या,--ऽपृच्छत्पुत्रीं सुवाचया ॥ २३६ ॥
त्वामुद्वोढुं च भीमेशो,--हे वत्से ! विश्ववत्सले ? । नितरामीहते वीरः, पार्वतीमिव शङ्करः ॥ २३७ ॥
नैच्छन्नामापि सा तस्य, तस्मै प्रत्युत कुप्यति । यथा शीलवती नारी, नेहते परपूरुषम् ॥ २३८ ॥
तामुपचरितुं चाटु,--वचोभिश्चितुरोक्तिभिः । प्रचक्रमे तथाऽप्येषा, बुशवन्मन्यते समम् ॥ २३९ ॥
तां यक्षसद्मन्यायान्तीं, यान्तीं ज्ञात्वा स भीमराट । तत्राध्वन्यन्यदाऽतिष्ठत्, समावर्जयितुं भृशम् ॥ २४० ॥
विलासोल्लासमहास्यादि,--हावभावावलीं तथा । वीतराग इवाशेषं; तस्यामजनि निष्फलम ॥ २४१ ॥

अन्यदा यक्षचैत्ये सा, ययौ सुमंगलायुता । भीमस्तद्वारदेशेऽस्थात्, कृतयक्षार्चनाविधिः ॥ २४२ ॥
सुमंगलां कुमार्यूचे, आवाभ्यां गम्यते कथम् ? । स धृष्टो दुष्टपापिष्ठः, किमप्याख्यास्यति ध्रुवम् ॥ २४३ ॥
अथवैष्यतिमध्ये सः, चेतसः खेददायकः । प्रविशन् वारणीयोऽयं, रक्ष्यस्तन्नाथवा त्वया ॥ २४४ ॥
श्रुत्वेति तद्वचो धाव्या, चिन्तां मा कुरु हे सुते ? । तत्रैव व्यजनेऽचिन्त्य,-चिन्तामणिसमप्रभा ॥ २४५ ॥
तद्वाक् कनकवत्याश्च, सुकर्णे कर्णमूलिका । जज्ञे पुरुषरूपा सा, मृगाक्षी निर्ययौ ततः ॥ २४६ ॥
जानन् देवार्चकं तां चा,-पृच्छदद्यापि सुन्दरी । यक्षगर्भगृहात्किं नो, निरगात्कमलावती ॥ २४७ ॥
तेनोक्तमियमेकाऽस्ति, नापरा काऽप्यदर्शि भोः ! इति प्रोच्य गता गेहं, गोपायति स्म मूलिकाम् ॥ २४८ ॥
ततो यक्षगृहं तेन, प्रविश्यान्तर्द्विशस्त्रिशः । संप्रेक्ष्याभूद्विलक्षास्यः, शाखाभ्रष्टो यथा कपिः ॥ २४९ ॥
ततो व्याप्तमनस्तापः, संप्राप्तो निजमन्दिरम् । सुमङ्गला कुमार्यन्ते, भीमः संजात कौतुकः ॥ २५० ॥
इत्यपृच्छत्तयोरन्ते, श्रीभीमो युवयोरिह । कथमागमनं जज्ञे, वृत्तान्तस्त्वेष कथ्यताम् ॥ १५१ ॥
ततः सुमङ्गलादिष्टा, शिष्टा कमलवत्यदः । एतद्व्यतिकरं मुलाद्,-वक्तुं प्रवघृते तदा ॥ २५२ ॥

श्रूयतां भो महाभाग ! महोषध्याः प्रभावतः । नरीभूयाथ निर्गत्य, त्वत्प्रत्यक्षमिहाऽगमम् ॥ २५३ ॥
अथोत्पत्तिं महोषध्याः, शृणु चिन्तामणेर्गृहम् । अगमाम वयं तत्रा,-न्यदाश्चर्यदिदृक्षया ॥ २५४ ॥
विद्यभून्मिथुनं तत्र, परिभ्राम्यदितस्ततः । उल्लङ्घनेन यक्षस्य, प्रासादोत्तुङ्गशृङ्गतः ॥ २५५ ॥
खाट्कृत्य पापतद्दृष्टं, शिष्टाचार प्रलोपनात् । पूजोपचार व्यापार,-व्याकुलं यक्षनाकिनः ॥ २५६ ॥ युग्मम् ॥
मैतस्या रूपमालोक्य, मत्प्रियो ह्यनुरागभाक् । अमुष्यां दक्षमुख्यायां, बोभवीतु विहाय माम् ॥ २५७ ॥
इति चिन्ताप्रपञ्चेन, सर्वतो व्याप्तया तया । खेचर्या वर्यया बद्धा, मम कर्णकटोरके ॥ २५८ ॥
विद्याबलेनाऽविज्ञाता, महौषधी तदा मया । तावत्पर्यन्तमज्ञाता, यावत्तन्मिथुनं ययौ ॥ २५९ ॥
ततश्चात्मानमद्राक्षी,-न्नररूपमनुत्तरम् । मुष्टा केनापि दुष्टेन, विलपन्ती मुहुर्मुहुः ॥ २६० ॥
यावत्समग्रमप्यङ्गं, स्त्रीयं सम्यग् व्यलोकयत् । खेचर्या विस्मृता पश्यत्, कर्णाभ्यर्णे च मूलिका ॥ २६१ ॥
यावदुच्छोटयामास, तावत्स्वाभाविकं पुनः । अजनिष्ट विशिष्टाङ्गं, तद् दृष्ट्वा तुष्टिभागभूत् ॥ २६२ ॥
ज्ञातस्तस्या महोषध्याः, प्रभावोऽयं महाद्भुतः । संगोप्य रत्ननिधिवत्, तदा दध्रेतरां मया ॥ २६३ ॥

जातामर्षेण हर्षेण, भीमेन प्रभीतिना । विविधोपायनैर्नाना, दानमानप्रदानतः ॥ २६४॥
रञ्जिता जननी तस्या,--स्तद्दाने प्रगुणीकृता । ततो राज्ञः पुरोऽपृच्छि, कन्यावैवाहमङ्गलम् ॥ २६५ ॥
राज्ञाऽप्यवाचि श्वो लग्नं, तत्सामग्रीं समां कुरु । तत्पुत्र्या विदिता वार्त्ता, तदा चिन्तापराऽजनि ॥ २६६ ॥
नो जल्पति न च भुङ्क्ते, नो शेते नैव तिष्ठति । न च ताम्बूलमादत्ते, सख्यालापं करोति न ॥ २६७ ॥
यथा भटोऽरिस्खलितो,--मानिनी मानखण्डिता । तथा कनकवत्याप, नैव क्वापि क्वचिद्रतिम् ॥ २६८ ॥
येनाहं ध्यानवेलायां, चतुरापि प्रवञ्चिता । विरुद्धवरदानेन, तत्रैव रजनीभरे ॥ २६९ ॥
तद्यक्षभवने गत्वा, यक्षेशमुपलभ्य च । प्रकाशयामि स्वाकूत,--मिति चिन्तयति स्म सा ॥ २७० ॥
निशीथसमये जाते, स्वगृहान्निर्ययौ ततः । प्रवञ्च्य पितरौ तन्त्रं, सखीलोकं च सोदरान् ॥ २७१ ॥
अथापद् यक्षसदनं, तमुपालब्धुमादधे । सुरोत्तमोऽसि धूर्त्तोऽसि, किं वा त्वमधमाधमः ? ॥ २७२ ॥
कारयित्वा सुधापानं, जरामृत्यपहारकम् । हालाहलं खादयित्वा, मत्प्राण--ध्वंसमिच्छसि ॥ २७३ ॥
दिव्यं भोज्यं परमान्नं, भोजयित्वाऽङ्ग पुष्टिदम् । दुर्गन्धं मूत्रगण्डूषं, त्वं कारयितुमुद्यतः ॥ २७४ ॥

तथापि रे वराक ! त्वं, किं करिष्यसि मां प्रति । ममात्मा चेन्मम वशे, दैवो रुष्टोऽपि किङ्करः ॥ २७५ ॥

इत्युक्त्वा सा जगामैवं, रणसिंहनरेशितुः । गुङ्करासन्नमुद्यानं, नानापादपसङ्कुलम् ॥ २७६ ॥

स्वीयोत्तरीयवस्त्रेण, तत्र प्रोच्चैस्तरे तरौ । निविडं पाशकं बद्ध्वा, मरणाध्यवसायिनी ॥ २७७ ॥

इति वक्तुं प्रवृत्ता सा, भो भोः कानन देवताः ! सर्वाशानां दिशापालाः !, श्रूयतां वचनं मम ॥ २७८ ॥

स्वेच्छया स्वच्छचित्तेन, रणसिंह वरेच्छया । यक्षश्चिन्तामणिर्दक्षः, समाराद्धोऽर्थसिद्धिदः ॥ २७९ ॥

निर्निमित्तेन तेनाहं, वैरिणा प्राणहारिणा । प्रतारिताऽस्म्यतोऽवश्यं, मरिष्याम्यागसो विना ॥ २८० ॥

वल्लभतमस्य दुस्सह,—विरहानलदह्यमानतनुसदना । प्राणान् कथं धरिष्ये, ततः श्रुतं जीवितव्येन ॥ २८१ ॥

ततश्चासमसत्त्वाया,--ऐहिकामुष्मिके भवे । स एव प्राणनाथोऽस्तु, रणसिंहपतिर्मम ॥ २८२ ॥

इति प्रोच्य निजे कण्ठं, प्रक्षिप्तोऽक्षुब्धचित्तया । निविडः पाशकग्रन्थि,--र्निजात्मानं मुमोचसा ॥ २८३ ॥

अनुमार्गं प्रलग्नाऽथ, समायासीत्सुमङ्गला । पश्यन्ती सर्वमुद्यानं, लम्बमानां निरीक्ष्य ताम् ॥ २८४ ॥

किञ्चित्किञ्चिन्निःश्वसन्तीं, शाखारोपितपाशिकाम् । हाहारवं तदा घोरं, प्रचक्रे करुणस्वनम् ॥ २८५ ॥

रौद्रमार्त्तस्वरं श्रुत्वा, रणसिंहः समागमत् । मा साहसेति जल्पन् स, तस्याः पाशकमच्छिदत् ॥ २८६ ॥

मूर्छया मूर्छिताङ्गां तां, निमीलितविलोचनाम् । ईषच्छ्वसन्तीं संवीक्ष्या,--ऽकार्षीच्छीतोपचारकम् ॥ २८७ ॥

तालवृन्ताञ्चलैर्वातं, सुधादेशीयजीवनैः । गोशीर्ष चन्दनोन्मिश्रै,--रभिषिच्य पुनः पुनः ॥ २८८ ॥

ततः सञ्जातचैतन्यां, तां कुमारः स पृष्टवान् । काऽसि त्वं सुभगे ! भद्रे !, प्रारब्धं किमु साहसम् ॥ २८९ ॥

तदा सुमित्र मित्रश्च, प्रावादीद्वदतां वरः । स्वामिन्नद्यापि नाज्ञायि, केयं नाम्ना विशेषतः ॥ २९० ॥

सुमङ्गलाऽवदद्देव !, गद्गदाक्षरपूर्वकम् । किं कुमार ? शुभाकार !, विसस्मार तत्रापि भोः ? ॥ २९१ ॥

मात्रा श्रीकमलिन्येयं, प्रत्ता श्रीभीमराजकुमरस्य । कमलवती लग्नदिनं, मत्वा विचिचेष्ट शिष्ठेति ॥ २९२ ॥

ततश्चामृतसारिण्या, कृपामन्थरया दृशा । प्रालुलोके कुमारेण, सा कनी कनकत्विषा ॥ २९३ ॥

किञ्चिद्विचिन्त्य चित्तेऽथ, सुमित्रः कुमरं प्रति । प्रावादीद् वचनं तथ्यं, द्वयोरानन्ददायकम् ॥ २९४ ॥

स्वार्थोद्यतेन मूढेन, किं विलम्बो विधीयते । क्षुत्पीडितेन संप्राप्तं, परमान्नं हि हीयते ? ॥ २९५ ॥

ततः सञ्जातचैतन्या, सिंहं प्रेक्ष्य कुमारिका । त्रपावनतवक्त्राब्जा, मज्जन्ती प्रीतिसागरे ॥ २९६ ॥

रोमाञ्चितवपुर्यष्टि,-र्निस्सीमप्रेममञ्जुला। गान्धर्वेण विवाहेन, परिणिन्येऽथ तेन सा ॥ २९७ ॥
सुमित्रमित्रेण समं, त-मेव पितुर्गृहे। जगाम कमलवत्याख्या, पूर्णस्वीयमनोरथा ॥ २९८ ॥
प्रातर्मित्रोदये जाते, कृतवैवाहमङ्गला। उद्वर्त्तनाङ्गरागश्री,-हारनेपथ्य भूषणा ॥ २९९ ॥
जगामेति जगत्कर्म,-साक्षी सूरोऽस्तपर्वतम्। विचिन्त्य मयि सूरेऽपि, भीमो लब्ध्वा विडम्बनाम् ॥ ३०० ॥
काष्ठास्वष्टास्वपि ध्वान्तं, युगपद् व्यानशेतराम्। सप्रकाशे प्रदेशे हि, विवाहे छद्म लक्ष्यते ॥ ३०१ ॥
ततो भीमः कृतस्नानो, विवाहोचितभूषणः। देदीयमानदानौघो, वाद्यमानस्मरध्वजः ॥ ३०२ ॥
हस्तिमल्लोपमप्रौढ,-हस्तिस्कन्धगतस्तदा। ध्रियमाणमितच्छत्रो,-वीज्यमानप्रकीर्णकः ॥ ३०३ ॥
सुराङ्गनोपमस्त्रैण,-गीयमानः पदे पदे। प्रोत्तार्यमाणलवणः, कृतप्रोञ्छनकोत्करः ॥ ३०४ ॥
विन्यस्त तोरणव्रातं, कृतवन्दनमालिकम्। विवाहमण्डपद्वारं, समागाद् भीमभूधवः ॥ ३०५ ॥चतुर्भिः कलापकम् ॥

इतश्च—

तदा सा कुमरी स्वस्य, पाणिग्रहणदीपकम्। वेषं ददौ सुमित्रस्य, पत्युर्मित्रस्य हर्षतः ॥ ३०६ ॥

स्वयं तु तस्य नेपथ्यं, परिधाय नृरूपभाक् । सिंहपार्श्वे समासीना, तेनाप्यालिङ्गिता तु सा ॥ ३०७ ॥

तस्या वेषं सनिर्विश्य, पाणिग्रहणमण्डपे । आजगाम सुमित्रोऽपि, विवाहकृतमङ्गलः ॥ ३०८ ॥

सुमङ्गलापि राभस्या,— न्महाकपट नाटिका । कूटनन्यवधूपान्ते, समागाद् वक्रवाक्यवाक् ॥ ३०९ ॥

ततो गणकराजेन, वेदोच्चारपुरस्सरम् । तल्लग्नं साधयामास, संमोदभरचेतसा ॥ ३१० ॥

ततो वैवाहिके कृत्ये, निवृत्ते वासवेश्मनि । भोगाङ्गसारे भीमोऽथ, सवधूको ययौ मुदा ॥ ३११ ॥

सस्नेहलैः सुमधुरैः, कोमलैः कामदीपकैः । वचोभिर्भाषयामास, तां नवोढां मुहुर्मुहुः ॥ ३१२ ॥

भृशमालप्यमाणा सा, नो किमप्युत्तरं ददौ । यावल्लज्जावनम्राङ्गी, करस्पर्शो न्यधात्ततः ॥ ३१३ ॥

ज्ञातं पुरुष एवैषः, प्रश्नश्चक्रे तदा पुनः । कोऽसि त्वं तव कान्ता ऽस्मि,---नव्योद्वाहांशुकाङ्किता ॥ ३१४ ॥

अतः परं भवत्पाणि,--स्पर्शाचिन्त्य प्रभावतः । योषिद्वे षाऽपि पुंवेषा, संजाता ह्य तदद्भुतम् ॥ ३१५ ॥

प्राणप्रिय ! तवैवेदं, माहात्म्यं यद्विजृम्भितम् । पाणिग्रहोत्सवव्याजात्, प्रापिता नररूपताम् ॥ ३१६ ॥

गत्वा वर्द्धापयामि स्वौ, पितरौ सत्वरं ततः । सुताऽप्यहं सुतो जज्ञे, कुमारकरसंस्पृशात् ॥ ३१७ ॥

इत्युदित्वा समुत्थाय, रणसिंहस्य सन्निधौ । एत्योवाच स्ववृत्तान्तं, चतुराश्चर्यकारकम् ॥ ३१८ ॥
सुमित्रेणोदिते सर्वो,---दन्ते तस्य पुरो भृशम् । सिंहः प्रियायुतो हस्त,--तालं जाहस्ति कौतुकात् ॥ ३१९ ॥
अवकमलवत्याख्या, कुर्वती हास्य ताण्डवम् । पराङ्मुखस्यान्यनार्याः, स्वामिनः संनिधौ पुनः ॥ ३२० ॥
पराङ्गना त्वं कथं ह्यत्र,—तिष्ठसे गच्छ रे ! बहिः । कैतया क्रोशनापूर्वं, भर्त्सनं तर्जनं व्यधात् ॥ ३२१ ॥
क्षणमात्रं विलम्ब्याथ, विस्मितो भीमभूपतिः । श्वश्रूश्वशुरयोः पादौ, प्रणम्येति व्यजिज्ञपत् ॥ ३२२ ॥
मातस्त्वत्तनया याऽऽसीत्, सुतो जज्ञे किमद्भुतम् ? । तद्वाक्याकर्णनादेव, स्तब्धाः क्षुब्धाश्च तेऽभवन् ॥ ३२३ ॥
भूपोऽवादीदालमाल,--मेवं जल्पति किं मुधा ? । किं स्यान्नटवदेकस्मिन्, भवे रूपविपर्ययः ॥ ३२४ ॥
विलक्षवदनो भीम,--स्तद्वृत्तान्तोऽन्यसाक्षिकम् । निवेदितस्ततस्तौ हि, चित्तसन्तापतापितौ ॥ ३२५ ॥
विलापं कुरुतो मुष्टा,---वयं धूर्त्तेन केनचित् । घटितोऽपि हि संयोगो,--हा ! दैवेनाऽन्यथा कृतः ॥ ३२६ ॥
वापीकूपवनोद्याना,--रामशून्यालयेष्वहो ! । सभाप्रपाऽन्यभूपौको,--देवालयमठादिषु ॥ ३२७ ॥
गवेषिताऽपि नाद्राक्षीत्, सा यावत्कमलावती । ततो मोह पिशाचेना,--चान्तौ चक्रन्दतुस्तुकौ ॥ ३२८ ॥ युग्मम् ॥

इतश्चोदय शैलस्य, चूलालम्ब्यभवद्रविः । तयोः करुणयेव स्वान्, करान् वितनुते दिवि ॥ ३२९ ॥
गोसे केनापि पुंसोक्तं, रणसिंहान्तिके मया । ददृशे नव्यनेपथ्या, नवोढा कमलावती ॥ ३३० ॥
तमाकर्ण्य नृपो भीमो, भृकुटी भीषणाननः । महाकोपारुणः कम्प्र,--कायः प्रस्फुरिताधरः ॥ ३३१ ॥
अनुगः सहस्रसङ्ख्यैः, पतदभ्रधरैर्भटैः । मरुत्पथं बधिरयन्, रणतूर्यरवोत्करैः ॥ ३३२ ॥
जयकुञ्जरमारूढो, भीमेन्द्रो हस्तिमल्लवत् । सिंहसैन्यं विनिर्जेतु,--माजगाम रणाङ्गणम् ॥ ३३३ ॥
भूपः कमलसेनोऽपि, शतयोद्धादिसद्भटैः । दुर्वारैर्वारणगणैः, संनह्यागान्महीपतिः ॥ ३३४ ॥
सिंहवद् रणसिंहोऽपि, साहसैकमहानिधिः । सज्जीकृतमहासेनो,–ऽभ्यधावद् भीमभूधवम् ॥ ३३५ ॥
स्वस्वस्वामिश्रियं जैत्रीं, काङ्क्षतोः सैन्ययोर्द्वयोः । भटानां समरारम्भः, प्रावर्त्तत परस्परम् ॥ ३३६ ॥
मदोद्धुरैर्मत्तमतङ्गजोत्करैः, समं गजानां तुरगैश्च वाजिनाम् ।
भटैर्भटानां रथिनां रथस्थितैः, पुंभिर्धनुष्मन्निकरैर्धनुष्मताम् ॥ ३३७ ॥
कुन्ताहता यत्र पतन्ति कुञ्जराः, खड्गैर्विभिन्नास्तुरगाः स्तरस्विनः ।
प्रादुर्बभूवोल्वणरक्तवाहिनी, नानाविहङ्गावलिसङ्कुला तदा ॥ ३३८ ॥

पतत्सुभटकोटीनां, लूनमुण्डाम्बुजावली । नृत्यत्कबन्धनालाढ्याः, केशसेवालसुन्दरा ॥ ३३९ ॥ युग्मम् ॥

भल्लिसेल्लकवावल्ल,—भल्लैः सुभटकोटयः । ध्वजातपत्रशफर,—मच्छिदन् राजभूषणम् ॥ ३४० ॥

एतादृक्षे रणे वृत्ते, भग्ने वीरगणेऽभितः । अष्टापद इवोत्तस्थौ, सिंहः शत्रुहरिं प्रति ॥ ३४१ ॥

केषां क्षुरप्रबाणेन, शिरोजान् मुण्डयन्नहो ! । नासिकाश्रवणादीनि, कर्त्तयन्नुरुविद्विषाम् ॥ ३४२ ॥

मूलादु त्खनयन् दाढा,--दन्तानुत्पाटयन् क्षणात् । सन्नाहांस्त्रोटयन् वीर,--स्त्रासयंश्च भयद्रुतान् ॥ ३४३ ॥

परप्रयुक्तबाणौघान्, छेदयन्नन्तरापथि । लुनानः खड्गयष्टीश्च, कोदण्डानां गुणावलीः ॥ ३४४ ॥

इत्थं प्रतिघ्नन् सकलं, रिपुसैन्यमदैन्य भाक् । बबन्ध भीमभूमीशं, पातयामास पादयोः ॥ ३४५ ॥

श्वशुरं च रथारूढं, चश्वा पुरुषसंनिभम् । आपाशबन्धबद्धं च, कृत्वाऽधार्षीत्तदा नृपम् ॥ ३४६ ॥

प्रेक्ष्य प्रतीक्ष्य क्षितिपं, निस्स्पन्दं निश्चलं ततः । राज्ञोऽग्रेऽकथयत्पुत्र--वृत्तान्तं च सुमङ्गला ॥ ३४७ ॥

अथागत्य च सा पुत्री, निपुणा विपुलाशया । नव्या नववधूवेषा, लज्जावनतकन्धरा ॥ ३४८ ॥

विज्ञाततातवृत्तान्ता, साऽनंसीत्तातपंकजम् । ततस्तातं च भीमं च, बन्धात्समम्मुचत् ॥ ३४९ ॥

जोत्कारं रणसिंहोऽपि; पूज्यत्वाच्छ्वशुरस्य हि । करोति विनयोपेतो, ललाटघटिताञ्जलिः ॥ ३५० ॥
स्थैर्यसौन्दर्यचातुर्यौ,—दार्यगाम्भीर्यविक्रमान् । कुलादीं स्तग्दुणान् मत्वा, तुष्टः पृष्टौ करं ददौ ॥ ३५१ ॥
ततो महोत्सवेऽतुच्छे, पर्यणायि शुभेऽहनि । भूपेन कमलवती, रणसिंहस्य धीमतः ॥ ३५२ ॥
भोगभङ्गीं तया सार्द्धं, भुञ्जानः सिंहभूपतिः । कतिचिद्दिनानि तत्राऽऽस्थ, स्वभुजोर्जितवीर्यभृत् ॥ ३५३ ॥
ततः प्रस्थाय मार्गस्थ,—भूपक्लृप्तोपढौकनम् । सङ्गृह्णन् कौतुकालोकं, कुर्वन्नागात्स्ववेश्मनि ॥ ३५४ ॥
रत्नवत्या विवाहार्थं, प्रस्थितोऽपि पुरात्पुरा । सोमापुर्यां समागच्छ,—न्नन्तरा निपुणो नृपः ॥ ३५५ ॥
लाभेन कमलवत्याः, स्वं कृतार्थममन्यत । यतो लाभेन हृष्यन्ति, देवदानवमानवाः ॥ ३५६ ॥
विषयासक्तयोर्नूनं, भोगभङ्गीभुजङ्गयोः । व्यापारो राजकार्यस्य, प्रत्यूहवद्भूत्तयोः ॥ ३५७ ॥
अथ सा रत्नवती च, चिन्तयामास चेतसि । सौभाग्यभाग्यभूः प्राण,—प्रियो राजसुतः सतु ॥ ३५८ ॥
किमर्द्धपथमागत्य, व्यावृत्य स्वपुरं प्रति । शकुनाभावतो यद्वा, ययौ वा मदभाग्यतः ॥ ३५९ ॥ युग्मम् ॥
आज्ञातमतिगम्भीर,—धीमत्या योषिता कया । वशीकृतः कटाक्षेणा--ऽऽमूलमन्त्रेण सोऽध्वनि ॥ ३६० ॥

अथ तस्या यदुण्डत्वं, पातयाम्युत्तमाङ्गके। तस्या एवेति मात्रा दी,—नापृच्छ्याकार्य मूषिकाम् ॥ ३६१ ॥
तद्दुःख दुःखितस्वान्ता, तीव्रसन्तापतापिता। कथयामास साहृत्स्थं, वृत्तान्तं गन्धमूषिकाम् ॥ ३६२ ॥
ततो मूषिकयाऽवादि, चिन्तां पुत्रि किं मा कुरु। मन्मन्त्रास्त्र प्रयोगो हि, दुस्साध्यार्थस्य साधकः ॥ ३६३ ॥
इत्युदित्वा राजगेहा,—न्निरगात्कूटनाटिका। अचिरेणैव कालेन, संप्राप्ता सिंहपत्तनम् ॥ ३६४ ॥
भागिनेयी कमलवती, तस्या इत्येति याति सा। कुमारान्तः पुरस्यैव,—मभ्यर्णे प्रतिवासरम् ॥ ३६५ ॥
नव्यनव्यकथाख्यानै,--र्गाथाप्रश्नोत्तरादिभिः। अपूर्व श्लोककाव्यैश्च, रञ्जयामास सा तकाम् ॥ ३६६ ॥
विश्वासपाशपतितो, मुग्धमार्गो यथाऽखिलम्। सुखेन वञ्च्यते तद्व,—न्नृपः सान्तःपुरस्तया ॥ ३६७ ॥
कुटिलात्मा भुजङ्गीव, पापधीर्गन्धमूषिका। मन्त्र तन्त्रप्रयोगैस्तौ, वशीचक्रे च दम्पती ॥ ३६८ ॥
ज्ञात्वा वश्यं राजलोकं, यत्तत्कथनकारकम्। ततो निशीथसमये, शुद्धान्ताभ्यर्णसंस्थिता ॥ ३६९ ॥
गेहे कमलवत्याश्च, भृत्यव्यापारयोगतः। कूटेनैवापरनर,--प्रवेशोऽदर्शि भूपतेः ॥ ३७० ॥
शीलालङ्कारशालिन्यां, तस्यां सत्याः शिरोमणौ। कलङ्कविषलेशोऽपि, चन्द्रमुख्यां न विद्यते ॥ ३७१ ॥

प्रतीच्यामुदयं याति, रविश्चेच्चन्द्रतो यदि । जायते वह्निवृष्टिश्च,-त्तरेदब्धौ सुराचलः ॥ ३७२ ॥
कदाचिद् वयोगेना-ऽथवा दैवानुभावतः । एतदपि भवेन्नूनं नत्वस्याः शीललाञ्छनम् ॥ ३७३ ॥
ज्ञाततच्छीलमाहात्म्यो, रणसिंहनरेश्वरः । तद्वचो नैव मन्येत, तृणवदपमानितम् ॥ ३७४ ॥
तत्परं तन्मनोऽत्यन्तं, सा विज्ञाय दुराशया । स्वकृतं विफलं मत्वोऽ--पायान्तरमथो व्यधात् ॥ ३७५ ॥
मायाप्रपञ्चं तन्वन्ती, पुनः प्राह नृपं प्रति । धिग् धिग् मे लोचने यच्चा,-न्यनरागमदर्शिनी ॥ ३७६ ॥
अथ मे देहि विवरं, देवि ! दिव्ये वसुन्धरे । प्रविशामि यथा नैव, शृणोमि श्रुतिदुःखदम् ॥ ३७७ ॥
भागिनेय्या अनार्याया,-ईदृशं दुर्विचेष्टितम् । इति श्रुत्वा नृपो दध्यौ, किं पीयूषे विषं भवेत् ? ॥ ३७८ ॥
तथापि भूपतिर्नैव, प्रत्येत्येतत्प्रजल्पितम् । तयोर्विद्वेषणकृते, सावधाना ततोऽभवत् ॥ ३७९ ॥
मूलिकामन्त्रतन्त्रौघ,-योगचूर्णप्रयोगकान्, सा प्रायुङ्क्तान्नपानेषु, ताम्बूलेषु विशेषतः ॥ ३८० ॥
तेषां प्रभावात्तच्चित्त,-स्तन्नेत्रोऽपि नराधिपः, वश्योपि तत्कथालापे, ज्वलति ज्वलदग्निवत् ॥ ३८१ ॥
ततश्चिन्ताप्रपन्नोऽभूद्, भूपालः करवाणि किम् ? किं त्यजामि वने एनां, किं वा देशान्तरं ददे ॥ ३८२ ॥

राज्यलक्ष्मीपरिभ्रष्टां, करोमि किं पितुर्गृहे । जहामि वा श्मशाने वा, विद्वेषण प्रभावतः ॥ ३८३ ॥ युग्मम् ॥

प्रत्ययाप्तं नरं कञ्चि,-दाकार्यैकान्तमादिशत् । कृत्वा राज्ञीं रथारूढां, कानने त्वं परित्यज ॥ ३८४ ॥

शिक्षामिवाज्ञां भूपस्य, प्रतीच्छ्य विनयेन वै । भुजिष्यः सुभगो नाम, सज्जीकृत्य रथं ततः ॥ ३८५ ॥

स्वामिनीं निकषाऽऽगत्य, भृत्यः प्रोवाच तां प्रति । राजेत्याज्ञापयन्नस्ति, गन्तव्यं कानने त्वया ॥ ३८६ ॥

इतश्चावसरे तस्याः, सव्याक्षं स्फुरितं त्वरा । ज्ञातं मारणपर्यन्तोपसर्गः समुपस्थितः ॥ ३८७ ॥

तथापि मे नृपाज्ञैव, प्रमाणं कुलयोषितः । तच्छासनं प्रकुर्वन्त्या— यद्वा तद्वा भवत्वदः ॥ ३८८ ॥

इति ध्यात्वा ततो देवीं, भर्तुरादेशपेशला । चिन्ताव्याकुलचित्ताऽपि, रथारोहणमातनोत् ॥ ३८९ ॥

ततः सुवेगेन रथः, प्रेरितः सुमुखेन सः । काननं प्रति गच्छन्ती, पप्रच्छ रथिनं प्रति ॥ ३९० ॥

नाद्यापि वनमायाति, नानापादपसङ्कुलम् । स प्राह स्वामिनि ! त्वं हि, प्रेषिता पितृसद्मनि ॥ ३९१ ॥

निशम्यैतद्वचः कर्ण,— वज्राघातसमं तदा । स्वामिनी चिन्तयामास, भुजिष्यः किं वदत्ययम् ॥ ३९२ ॥

अथवेदृग्विधं कार्य,—मनार्योचितमन्त्र च । अविचार्याऽपरीक्ष्य हि, पश्चात्तापकरं पुनः ॥ ३९३ ॥

हृदनिर्वापणकरणं, किं करोति महीपतिः। किं वा केनापि दुष्टेना,—ऽदृष्टेन छलितो नृपः ॥ ३९४ ॥युग्मम्॥
एवं विचिन्तयन्ती सा, पाडलीखण्ड सीमनि। समेत्य तं प्रति प्राह, निवर्त्तयत्वितो भवान् ॥ ३९५ ॥
तेऽमी तुङ्गा, हि तरव,—इदं तत्पाडलीपुरम्। स्वयमेवेतः प्रयास्यामि, छललेशोऽपि नैव ते ॥ ३९६ ॥
ततो देव्याः पादपद्मं, प्रणम्य विनयेन सः। साक्षाल्लक्ष्म्यवतारे! त्वं, क्षमस्वागः क्षितिप्रिये! ॥ ३९७ ॥
मया परवशेनैव, चण्डालोचितकर्मणि। प्रवृत्तं पाप्मना यस्माद्, राज्ञामाज्ञा बलीयसी ॥ ३९८ ॥
सोचे सत्पुरुष! तव, को दोषो राजशासनम्। साधयतो यतो भृत्य,—वृत्तिव्यापारशालिनः ॥ ३९९ ॥
मद्वचसा त्वया वाच्यं, राज्ञोऽग्रे भो भुवःप्रभो!। आवयोः कुलसम्पन्न,—स्नेहयोरेकचित्तयोः ॥ ४०० ॥
आबालकालतोऽन्योन्य,—रिरंसापरवश्ययोः। त्वया कस्योचितं चक्रे, क्रूरकर्मेति साम्प्रतम् ॥ ४०१ ॥
ततोऽश्रुपातेन भुवं, सिञ्चन्तीं तां मुमोच सः। कस्मिंश्चित्पादपाभ्यर्णे, रथादुत्तार्य वर्यतः ॥ ४०२ ॥
स जोत्कारं विधायोच्चै,—र्ववले सा तरोस्तले। स्थिता प्रलापं दैवाना,—मुपालम्भांश्च तन्वती ॥ ४०३ ॥
चिन्तयन्ती स्वापराधान्, सा पाणिग्रहणादितः। इत्यादिकल्पनाजाल—परा, तस्थावधोमुखी ॥ ४०४ ॥

दध्यौ कृतापराधेव, वियोगः स्वल्पदुःखदः। अकृतागसि यस्त्याग,—स्तद्दुःखं सोढुमक्षमा ॥ ४०५ ॥
शैलसारशिलापट्ट,—परुषाग्राह्यचेतसे। क्षणरक्तविरक्ताय, पुरुषाय नमोनमः ॥ ४०६ ॥
अस्यामवस्थापन्नाया,---मम्बे ! त्वमिति वत्सले !। वियोगतापसन्तप्तां, रक्षमाऽमृतलोचने ! ॥ ४०७ ॥
अथवा याहि रे मातः !, शून्यारण्ये गरीयसि। मद्दुःखश्रुतिलोष्टैर्हृद् हृट स्फोटो भविष्यति ॥ ४०८ ॥
जायन्ती वर्द्धयन्ती या, परिणीताऽपि पुत्रिका। जनयन्ती पितुश्चिंतां, सर्वदा दुःखकारिणी ॥ ४०९ ॥
सुपरीक्षितशीलाऽहं, नृपचेतोऽब्जभास्करी। तदत्र कोऽपि क्षुद्रस्य, सञ्चारः पोस्फुरत्य हो ! ॥ ४१० ॥
ततः पितृगृहं नैव, प्रविशामि वसामि वा। अत्रैव पुरुषो भूत्वा, स्वैरमौषधियोगतः ॥ ४११ ॥
यतो योषिज्जनः प्रायः, प्रार्थ्यः सर्वनृणामपि। सिद्धान्नवद् यत्र तत्र, प्रकृत्या सुन्दरत्वतः ॥ ४१२ ॥

यत उक्तम्—

ताम्बूलं स्त्रीकटाक्षाणि, तरुण्यः शर्वरीपतिः। पद्मा पद्माकरक्षीरं, चित्तं कस्य हरन्ति न ! ॥ ४१३ ॥
जगच्छ्लाघ्यं मया शीलं, पाल्यं लाल्यं प्रयत्नतः। विनष्टेऽस्मिन् समं नष्ट,---मैहिकामुष्मिकं फलम् ॥ ४१४ ॥

यतः—

शीलं सर्वगुणाधानं, शीलं दुर्गतिवारणम् । शीलं शाश्वतसौख्यस्य, कारणं गात्रभूषणम् ॥ ४१५ ॥

शीलं निधानं गुणरत्नराशेः, शीलं हि मूलं सुकृतद्रुमस्य ।

शीलं सदाचारविचारहेतुः, शीलं भवोत्तारणसारसेतुः ॥ ४१६ ॥

शीलप्रभावाद्विकरालकालो,-व्यालोऽपि पुष्पस्त्रजति प्रगन्धी ।

क्ष्वेडं च पीयूषति नीरराशि, र्गोपादति क्षीरति वीतहोत्रा ॥ ४१७ ॥

ततः स्वशीलरक्षार्थं, भूत्वा पुरुषवेषतः । तस्थौ पाडलिपुरतो,–ऽप्राच्यां चक्रपुरोत्तमे ॥ ४१८ ॥

बिभ्रती पुष्पबटुतां, चक्रभृद्देवतालये, । श्रीमती कमलवती, मृगाक्षी कमलानना ॥ ४१९ ॥ युग्मम् ॥

इतश्चागत्य सुभगो,---नत्वा कुमरमब्रवीत् । देवीपरित्यागकथां, सकलां च सगद्गदम् ॥ ४२० ॥

ततोऽपगतमन्त्रस्य, तन्त्रस्यापि प्रभावतः । कुमारः कुरुते पश्चा,---त्तापं सन्तापदीपकम् ॥ ४२१ ॥

सा जीवति किमद्यापि, मिथ्यादोषेण दूषिता । मया पापात्मना देवी, किं गता पितृमन्दिरे ॥ ४२२ ॥

संप्रत्यहं कथं स्वभ्रूधो,—दर्शयिष्ये स्वाननम् । धिग् मे कौशलत्वस्य, येनैवं चिन्तितं मया ॥ ४२३ ॥

दुर्ध्यानं ध्यायतस्त्वेवं, हृत्स्फोटः किं न मेऽभवत् । किं वा जिह्वा न तुत्रोट, यया दुर्जल्पितं तदा ॥ ४२४ ॥

किं वा गगनात्पतत,—चक्रं वज्रोपमं च शतधारम् ।

किं नो पपात मूर्द्धनि, शतखण्डं येन मे न स्यात् ॥ ४२५ ॥

या गन्धमूषिका पापा, दुर्गता साऽपि निर्गता । सुन्दरी दृश्यते नैव, यया मे वं विचेष्टितम् ॥ ४२६ ॥

ततः श्रीरणसिंहोऽपि, ध्यातवानसि चेतसि । किं शोकाकुलपरा, कृत्वैवं कुत्र सा गता ॥ ४२७ ॥

साऽथ सोमापुरीं गत्वा, रत्नवत्या पुरस्तथा । समाचचक्षे न्यक्षेण, वृत्तममूलचूलतः ॥ ४२८ ॥

श्रुत्वा संमोदसंसर्पद्दया साऽभवत्तदा । ततो गत्वा नरेशस्य, पितुरग्रे प्रमद्वरा ॥ ४२९ ॥

इत्युक्त्वा प्रेषयामासा,—ऽमात्यानात्मान् समक्तिकान् । सिंहपार्श्वं समागत्य, ते प्रोचुर्नृपशासनम् ॥ ४३० ॥

त्वयि दत्तैकचित्तायाः, प्रीतायास्तव दर्शने । रत्नवत्या विवाहार्था,—गन्तव्यं कुमारस्त्वया ॥ ४३१ ॥

ततश्चाभाणि सिंहेन, नैव जानाम्यहं पुनः । सर्वार्थसाधको राजा, ज्ञाता कनकशेखरः ॥ ४३२ ॥

ततो जोत्कृत्य निर्गत्य, भूपोपान्तं समेऽगमन् । तं नत्वा विनयोपेताः, पुरुषोत्तमनन्दितम् ॥
सर्वं विज्ञपयामासुः, पुरः कनकशेखरम् ॥ ४३३ ॥ षट्पदः ॥

राजंस्तदङ्ग पश्यतो, वलितः कुमरोत्तमः । तद्दिनात् स्मरत्येषा, तस्या ध्यायैव संस्थिता ॥ ४३४ ॥
साम्प्रतं प्रेषयत्वेनं, कुमारं मारसंनिभम् । इति श्रुत्वा नृपोऽवादीत्, भागिनेयी तु सा मम ॥ ४३५ ॥
ततो भूपेन सिंहस्य, तदुक्तं भणितं तदा । स्वसुताया इहोद्वाह,---स्तस्याः कार्यो मयैव हि ॥ ४३६ ॥
स तदादेशतः सर्वाभिसारेण बलान्वितः । शुभाह्नि शुभलग्ने च, प्रतस्थे विहितोत्सवे ॥ ४३७ ॥
कतिभिर्वासरैः प्राप, चक्रपूर्वाह्वकाननम् । निवेश्य वाहिनीं याति, स्वयं चक्रभृतोऽर्चने ॥ ४३८ ॥
इतश्च स्फुरितं तस्य, दक्षिणाक्षेण सत्वरम् । ततश्च तेन विज्ञातं, प्रियमेलो भविष्यति ॥ ४३९ ॥

उक्तञ्च—

शिरसः स्फुरणे राज्यं, सव्याक्षस्य प्रियागमः । दोः स्फुरणं प्रियजन—बाहुमालिङ्गनं भवेत् ॥ ४४० ॥
पुष्पाणि पुष्पबटुकः, कुमारस्य कराम्बुजे । दिव्यानि पञ्चवर्णानि, दत्त्वा मूल्यं यथेप्सितम् ॥ ४४१ ॥

लात्वा तानि महर्घ्याणि, पूज्यान् पूजयितुं तदा। सिंहः प्रववृते यस्मात्, सन्तः सूचितकारिणः ॥ ४४२ ॥

बटुः प्रत्यभिजानाति, भर्त्ता मे एवं सिंहराट्। पुना रत्नवती पाणि,--ग्रहणाय प्रतस्थिवान् ॥ ४४३ ॥

सिंहोऽपि प्रेष्यते दध्यौ, विस्मयस्मेरमानसः। किमेषा कमलवती, मच्चित्तानन्ददायिनी ॥ ४४४ ॥

ततः पूजां विधायोच्चै,--र्निवृत्तः स्वाश्रये बटुम्। निमन्त्र्यातिथि भुक्त्यर्थं, पूर्वप्रेमाणुभावतः ॥ ४४५ ॥

अग्रासने निवेश्यैनं, भोजयामास भक्तितः। नानाविधाशनैः खाद्यैः, स्वाद्यैर्घोलान्तभोजनैः ॥ ४४६ ॥

ततो दिव्यानि वासांसि, नानाऽलङ्करणानि च। दापयामास तस्मै स,—भूमिदेवाय सादरम् ॥ ४४७ ॥

प्रोक्तं व्यक्तं च भो भूमिदेव ! त्वां पश्यतो मम। निर्निमेषदृशौ तृप्तिं, नाप्नुतः केन हेतुना ? ॥ ४४८ ॥

विप्रः पठति खल्वेवं, कस्य कोऽपि सुखप्रदः। चन्द्रोदये भवेद्वृद्धि,—भाजी वार्द्धिर्न चाऽपरः ॥ ४४९ ॥

कुमारः प्राह भो विप्र !, गन्तव्यं त्वयाऽग्रतो मम। त्वत्स्नेहपाशसम्बद्धं, नैवं गच्छति मन्मनः ॥ ४५० ॥

ततः प्रसादमाधाय, मत्सार्थे चलताद्द्विजः। मोक्तव्योऽत्र समानीय, पुनस्त्वं निश्चितं मया ॥ ४५१ ॥

विप्रः प्रोवाच भो राजन् ! यक्षार्चनविधौ मम। प्रत्यूहं मा विधेहीति, भृतं मे वाचयाऽनया ॥ ४५२ ॥

पुनः प्रोवाच कुमारः, समेतव्यं त्वया किल । त्वां विना नैव गच्छामि, पादमात्रमपीत्यतः ॥ ४५३ ॥
ततोऽमात्यादिभिर्लोकै,—र्विज्ञाय नृपनिश्चयम् । स तथा भणितो नूनं, चचाल चतुरो यथा ॥ ४५४ ॥
कुमारो भूमिदेवेन, साद्धं क्रीडति गच्छति । भुङ्क्ते स्वपिति जागर्त्ति, करोति प्रतिबिम्बवत् ॥ ४५५ ॥
द्विजोत्तमेन तद्भाव,---भावनार्थं कदाचन । रहस्युक्तं कथं खेदं, धत्से देवीकृतेऽन्वहम् ॥ ४५६ ॥
कुमारः प्राह भूदेव !, देव्याः किं वर्णयाम्यहम् । निस्सीमरूपलावण्य,---कलाकौशलसम्पदः ॥ ४५७ ॥

किं बहुना विधिनेयं, विनिर्मिता निर्मलाऽणुदलिकगणैः ।
चन्द्रकलेव कलङ्कैं, र्मुक्ता या देवतातिशया ॥ ४५८ ॥

तां विना सकलं विश्वं, शून्यं पश्यामि साम्प्रतम् । किं पुनः प्रीतिजनने, चित्तं विश्राम्यति त्वयि ॥ ४५९ ॥
द्विजेनाऽभाणि भो भूप !, मा ताम्यतां हि तत्कृते । दैवेनापहृतं सर्वं, दुष्कृतं तव साम्प्रतम् ॥ ४६० ॥
ततः प्रयाणैरच्छिन्नैः, सिंहः सोमापुरीं ययौ । चतुरङ्गचमूरागात्, संमुखः पुरुषोत्तमः ॥ ४६१ ॥
समुच्छलत्पताकौघे, समुच्छ्रितसुतोरणे । परमोत्सवेन राज्ञा सः, सोमापुर्यां प्रवेशितः ॥ ४६२ ॥

विचित्रोल्लोचसंयुक्ते, सुधाधवलितोत्तमे । प्रासादे स्थापयामास, कुमारं पुरुषोत्तमः ॥ ४६३ ॥
दैवज्ञदत्तसल्लग्ने, जाते माङ्गल्यनिःस्वने । सिंहेन रत्नवत्याश्च, वृत्तमुद्वाहमङ्गलम् ॥ ४६४ ॥
ततो हरिकरिग्राम,—पुरस्वर्णाद्यलङ्कृतीः । तदा विश्राणयामास, तस्मै श्रीपुरुषोत्तमः ॥ ४६५ ॥
कतिचिद्दिनानि तत्रास्थात्, कथाकौतूहलादिभिः । द्विजेन रत्नवत्या च, समं सौख्यं समुद्वहन् ॥ ४६६ ॥
अन्यदाऽवसरे प्राप्ते,--ऽपृच्छद् रत्नवती पतिम् । कीदृक् सा कमलवती, मृताऽपि त्वन्मनोहरो ॥ ४६७ ॥
सोऽवोचत्पूर्वमागच्छन्, त्वत्पाणिग्रहणेहया । नानामनोरथैरह,—मिगमाद्वालितो यया ॥ ४६८ ॥
रम्भा-गौरी-रति-प्रीति,--कमलाद्या अनेकशः । या अभूवन् तकास्तस्याः, कलां नार्हन्ति षोडशीम् ॥ ४६९ ॥
ततः केनोपमानेन, तत्स्वरूपं त्वदग्रतः । निरूपयामि हे देवि !, सर्वातिशयसुन्दरम् ॥ ४७० ॥
किञ्च दुर्विधिना चक्रे, मम दुर्दैवयोगतः । आवयोर्विरहस्तेन, परिणिन्ये मया त्वकम् ॥ ४७१ ॥
स्वादिष्टं मृत्युहृद् याव,--न्नाप्यते परमामृतम् । तावत्पापहं वारि, नो पीयेत तृषार्दितैः ॥ ४७२ ॥
ततश्च रत्नवत्याख्यत्, सामर्षं स्वाभिमानतः । सोल्लासं प्रति पृथ्वीशं, निश्शेषनिजचेष्टितम् ॥ ४७२ ॥

यथा हि गन्धमूषायाः, प्रेषणं विट्प्रयोगतः। परपुंसः प्रवेशश्च, विद्वेषोच्चाटनादिकम् ॥ ४७४ ॥
तत्सर्वं कुमराध्यक्षं, तयाऽऽख्यातं निशम्य च। तद्दोषं तन्मुखेनैवा,--ऽङ्गीकार्यं निर्वृताऽभवत् ॥ ४७५ ॥
कलङ्क-पङ्कं प्रक्षाल्य, कस्को वा नोज्ज्वलो भवेत्। तच्छ्रुत्वा रोषताम्राक्षो,--भृकुटीविकटाननः ॥ ४७६ ॥
सापराधां रत्नवतीं, निर्भर्त्स्यं च ततो नृपः। मद्दृष्टिपथतो दूरं, गच्छ गच्छ विशाधमे! ॥ ४७७ ॥
आः पापे! किं त्वयाऽकारि?, दुष्कृत्यं श्वपचोचितम्। विक्षेपागाढदुःखौघे, ययात्मा नरकावटे ॥ ४७८ ॥
दानमानादिभिर्नारी, मानिताऽपि स्वभावतः। आसक्तिं क्वापि नोधत्ते, स्त्रीचरित्रं हि दुस्तरम् ॥ ४७९ ॥

यत उक्तम्—

प्राप्तुं पारमपारस्य, पारावारस्य पार्यते। स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ॥ ४८० ॥
नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात्। आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ॥ ४८१ ॥
ततोऽलीककलङ्केन, तदा निर्धाटिता मया। ततोऽपमानतो देवी, पञ्चत्वं प्राप सत्वरम् ॥ ४८२ ॥
भो भो भृत्याः! समानीय, काष्ठानि कुरुत स्वयम्। मत्प्रासादप्रतोल्यां हि, सुसज्ञां महतीं चिताम् ॥ ४८३ ॥

तत्पापमलिनात्मानं, शोधयामि निजं ततः । ज्वालाजालकरालेऽपि, चिताग्नौ सर्वसाक्षिकम् ॥ ४८४ ॥

इत्याज्ञां प्राप्य भूपस्य, भृत्यैस्तत्साधनोद्यतैः । चितां कृत्वाऽतिकृच्छ्रेण, ते सिंहाय न्यविज्ञपन् ॥ ४८५ ॥

ततः स सपरीवारः, प्रतिषिद्धोऽपि भूपतिः । कदाग्रहग्रहग्रस्तः, प्रचचाल चितां प्रति ॥ ४८६ ॥

तदा नृपोक्तं विज्ञाय, पौरलोकैस्तिरस्कृता । निकृष्टदृष्ट्याऽऽविष्टा, पापिष्ठा गन्धमूषिका ॥ ४८७ ॥

एतस्याश्चेष्टितं दृष्टं,–देतन्मूर्द्धिपतत्तरम् । इत्युदित्वा जनैः सर्वै,–र्निन्द्यमाना पदे पदे ॥ ४८८ ॥

लूनपुच्छश्रुतिद्वन्द्व,–खरारूढां विधाय ताम् । विगोप्य लोकप्रत्यक्षं, राज्ञा निर्वासिता पुरात् ॥ ४८९ ॥

यतो नारीजनोऽवध्य,–इत्यतो रणसिंहराट् । मन्त्रिसामन्तभूपाद्यै,–र्वार्यमाणो मुहुर्मुहुः ॥ ०

मरणैकाग्रपरमिक,---श्चितादेशमशिश्रयत् । जातो हा हा रवोदग्रः, सर्वत्र नगरे तदा ॥ ४९१ ॥

श्वेतांशुगन्धमाल्यादि,---भूषणैर्भूषितो नृपः । कमलवत्यनुरागाद्–रक्तचित्तस्तदाऽभवत् ॥ ४९२ ॥

चितां प्रविष्टः कुमरः, पार्श्वेऽग्निः प्रगुणीकृतः । पुरुषोत्तमभूपेन, विज्ञप्तो वाडवस्तदा ॥ ४९३ ॥

भो ! तवायं परं मित्रं, त्वद्वचोलङ्घनाक्षमः । तेन त्वया तथा वाच्यो, यथा पापान्निवर्त्तते ॥ ४९४ ॥

ओमित्युक्त्वा द्विजोऽवादीत्, सस्नेहं कुमरं प्रति ।

भो ! त्वया किं समारंभे, नीचान्नीच जनोचितम् ॥ ४९५ ॥

अन्यच्च श्रीचक्रपुरा,–त्स्वस्थाने किमवादि माम् ? । यदहं कृतकृत्यस्त्वा,–मत्र मोक्ष्ये पुनर्द्विजः ॥ ४९६ ॥

विप्रः—

देव्यलीककलङ्का घातात्, कथं शुध्यति पाप्मनः । मलाविलं कथं वासो, मलिम्ना कज्जलाम्बुना ॥ ४९७ ॥

कुमरः—

मृताऽपि कमलवती, मयाऽनुगमनेन भोः ! । प्राप्यत इति बुद्धिस्ते, जाड्यमेव व्यनक्तय हो ! ॥ ४९८ ॥

द्विजः—

स्वस्वकर्मेरितः प्राणी, बम्भ्रमीति निरन्तरम् । संसारे चतुरशीति,–लक्षसङ्ख्यासु योनिषु ॥ ४९९ ॥

किञ्च—

सगुणं निर्गुणं वाऽपि, कार्यजातं चिकीर्षता । विवेकिना परिणति,–रवधार्या प्रयत्नतः ॥ ५०० ॥

यतः—

अविमृश्यार्थकरणं, पश्चात्तापनिबन्धनम् । तस्मात्कार्यार्थिभिः कार्यं, कार्यं सद्बुद्धिपूर्वकम् ॥ ५०१ ॥

विप्रः—

कुमार? त्वं मदाख्यातं, कुरु नावाञ्छिताग्रहम् । रक्ष रक्ष निजप्राणान्, जीवन् भद्रशतोपदृक् ॥ ५०२ ॥

यतः—

सन्धिप्रभृत्युपायौघं, सचिवाख्यायमादरात् । यदि कुर्वन्ति राजान,—स्तेनैवैश्वर्य शालिनः ॥ ५०३ ॥

प्राणान् धारयतः सङ्गो, जातुचिन्नाम संभवेत् । प्राणत्यागे पुनर्नैवा,--वश्यं मेलापको भवेत् ॥ ५०४ ॥

कुमारः—

सप्रत्याशं सहर्षं च, सिंहः प्राह द्विजं त्वया । साक्षाद् भो ! ददृशे क्वापि, जीवन्ती ध्यानतः प्रिया ॥ ५०५ ॥

इति पृष्टे द्विजः प्राह,—सावष्टम्भं वचो दृतम् । ज्ञातं ज्योतिष्कसारेण, ध्यानेन च समं मया ॥ ५०६ ॥

कुमार ! त्वद्दिशि माऽस्थ, सुस्थिता विधिसंनिधौ । उपविष्टा मया दृष्टा, प्रहृष्टा गुणसम्पदा ॥ ५०७ ॥

यदुच्यते निजात्मानं, प्रमुच्य विधिसंनिधौ । तामानयामि सत्यं चेत्कृतार्थोऽहं ततोऽभवम् ॥ ५०८ ॥

कुमारो वक्ति भूदेवा,-ऽद्यापि कार्यविलम्बनम् । किं क्रियते द्विजो वक्ति, विस्मेर कमलाननः ॥ ५०९ ॥



राजन् ! मद्ध्यान लब्धादि, प्रसीदन्ति समाः कलाः । मद्दक्षिणां विना नैव, तेन देहीति दक्षिणाम् ॥ ५१० ॥

पुरा द्विज ! निजात्माऽसौ, पश्चात्स्वीयं मनः पुनः । आन्तरं बहिरङ्गं च, दत्तं ते दक्षिणापदे ॥ ५११ ॥

अस्तु तावत्तवात्मादि, त्वत्पार्श्वे एव निश्चितम् । मार्गयामि यदा यद् य,-त्तत्तद्विश्राम्यतां हि मे ॥ ५१२ ॥

एवमेवास्तु भूदेव !, घनवागडम्बरेण किम् ? । प्राणप्रियां समानीय, हर्षोत्कर्षं कुरु द्विज ! ॥ ५१३ ॥

ततस्तिरस्कारिण्यन्त,-र्विधाय मण्डलादिकम् । ध्यानालीनः सुयोगीव, तस्थावेकाग्र मानसः ॥ ४१४ ॥

अधुना दर्शनीया सा, दिष्ट्या सज्ञानतोपधी । इत्युक्ते रणसिंहस्या,-नन्दः प्रादुरभून्महान् ॥ ५१५ ॥



मृताऽप्यागच्छति ध्यानाद्,-देवी कमलवत्यहो ! । एवं सर्वं पुरं भूप,-स्तदाश्चर्यमयोऽभवत् ॥ ५१६ ॥

अहो ? अहो ? द्विजेशस्य, माहात्म्यं ह्येकजिह्वया । कथं वर्णयितुं शक्य,-मित्यालापपरो जनः ॥ ५१७ ॥

तदाऽऽकाशाङ्गणे विद्या--धरीलोके च संस्थिते । पाणिपद्मं पञ्चवर्ण,--दिव्यमन्दार दामनि ॥ ५१८ ॥

कर्णा-मूलीं छादयित्वा, द्विजराजोऽभवत्तदा । सुरूपा कमलवती, कमलारूपतर्जिका ॥ ५१९ ॥

तदा विद्याधरैर्विद्याधरीभिस्त्रिदशैर्नरैः । कण्ठपीठे च तन्मूर्द्धि न, पुष्पवृष्टिर्विनिर्ममे ॥ ५२० ॥

ततः क्षणान्तरे सिंहा, व्यपनीय परिच्छदाम् । प्रेमपूर्वं व्यलोकिष्ट, मन्ये ज्ञाता भिया मम ॥ ५२१ ॥

तुष्टेन कुमरेणैवं, लोकाध्यक्षं प्रजल्पित । पश्यत पश्यत भोः ! भोः !, प्रिया कमलवत्यहा ! ॥ ५२२ ॥

लावण्यसौभाग्यमणी, मण्याकर खनीनिभा । यां वीक्ष्य जनता ब्रूते, हीना रत्नवतीन्यतः ॥ ५२३ ॥

क्व रीरी ? क्व च कल्याणं ?, क्व वज्रं ? क्व च कर्करी ? ।

पुरस्तात्कमलवत्या,--स्तादृशी रत्नवत्यहा ! ॥ ५२४ ॥

ततः स्थाने कुमारेण, त्यक्त्वा रत्नवतीं कृतः । प्रतिबन्धस्तदेच्छेत्को, वज्रमुज्झित्य कर्करीम् ॥ ५२५ ॥

ततो राज्ञा निजच्छत्र,--स्याधस्तात्स्नापिता मुदा । सर्वाङ्गभूषणा दिव्य,--दृष्या चक्रे सुरीसमा ॥ ५२६ ॥

ततो राजा तया सार्द्धं, भुङ्क्ते भोगाननेकशः । यथा सुरेश्वरः सार्द्धं, रम्भा-तिलोत्तमादिभिः ॥ ५२७ ॥

अथाऽप्राक्षीत्प्रियां सिंहो,--रहः कान्ते ! वटुः स च । दुःखान्यनुभवन्नस्ति, वराको विधिसन्निधौ ॥ ५२८ ॥

पश्चात्कर्णोपधीलाभ,--मुख्योदन्तनिवेदनम् । देव्या-सव्यासनश्चक्रे, स मुदा स्वामिनः पुरः ॥ ५२९ ॥

किञ्च—

कुर्वता विश्वनिर्माणं, विधिना दुष्टबुद्धिना । प्रतिपक्षयुतं वस्तु, चक्रे क्ष्वेडसुधादिवत् ॥ ५३० ॥

देवीं दध्यावसौ राजा, रत्नवत्यां पराङ्मुखः । निष्प्रमाऽतो भवेद्देवोऽपवादो मे जगत्त्रये ॥ ५३१ ॥

कूटकोटि युताऽप्येषा, सापराधाऽनुशष्टिभाग । तथापि ह्युपकर्त्तव्यं, मया रत्नवतीं प्रति ॥ ५३२ ॥

यत उक्तम्—

उपकारिषु यः साधुः, साधुत्वे तस्य को गुणः । अपकारिषु यः साधुः, स साधुः साधुरुच्यते ॥ ५३३ ॥

ततः कदाचिदानन्द,-- मये रहसि भूपतौ । स्ववरं प्रार्थयामास, प्राग्दत्तं कमलावती ॥ ५३४ ॥

अथोऽचे कुमरो देवि !, यत्तुभ्यं रोचतेतराम् । तत्त्वं कथय सत्स्वैरं, यथा यच्छामि तद्वरम् ॥ ५३५ ॥

यद्येवं तावदीश! त्वं, समदृष्ट्या विलोकय । सामेनां च यतस्ते मे, कीर्त्तिर्विश्वे विजृम्भते ॥ ५३६ ॥

तया प्रेरितया चक्रे, कथमप्यनया यदि । दुष्कुलीनोचितं कर्म, राजंस्तत्क्षम्यतां मयि ॥ ५३७ ॥

निर्घृणा चञ्चला योषित्, कुशीला स्वार्थ साधना । एवं विदधती देवी, स्वापवादमपाकरोत् ॥ ५३८ ॥

अथान्यदा कुमारेण, भूपः कनकशेखरः । विज्ञप्तः सोऽनुजानाति, प्रयाणाय विवेकधीः ॥ ५३९ ॥

भूरि भूषणकल्याण,--दामदासीवरांशुकान् । दत्वा संमानिता पुत्री, पतिता पितृपादयोः ॥ ५४० ॥

चतुरङ्ग-चमूर्दिव्य,--वासः स्वर्णाद्यलङ्कृतीः । दत्वा श्रीरणसिंहोऽपि, विसृष्टः प्रणतेः पुरः ॥ ५४१ ॥

अनुज्ञाप्य च भूमीन्द्रं, प्रातिष्ठत ततः पुरात् । श्रीसिंहः सपरीवार,-श्चतुरङ्गबलान्वितः ॥ ५४२ ॥

क्रमेण पाडलीखण्ड,--सीमभूमिमवाप सः । तावत्पूर्व सुविज्ञात,--स्वसुताद्भुतसत्कथः ॥ ५४३ ॥

सत्सेनः कमलसेनः, संप्राप्तः पुनरत्वरा । अनर्घ्यो महिमानर्घ्यो, द्वात्रिंशल्लक्षणान्वितः ॥ ५४४ ॥

साधुः प्राघूर्णकस्त्वेष,--इति हेतोः स्ववेश्मनि । नीत्वा कमलसेनेन, सिंहः सन्तोषितो मुदा ॥ ५४५ ॥ युग्मम् ॥

कमलेवाऽऽश्चर्यकरी, कमलवती कमलचारुतरवदना । कतिचिद्दिना न्युषित्वा, गौरविता तेन भूपेन ॥ ५४६ ॥

कमलिन्याम्बया स्वाङ्क--मारोप्याह्लिनता तदा । आलिङ्ग्याऽऽश्वास्य तनया,--ऽनुवाच प्रेमपूर्वकम् ॥ ५४७ ॥

वत्से ! पतिपराभूता, किं नागाज्जनकालये ? । दुःखितायाः स्त्रिय स्त्राण,--मवश्यं पितृमन्दिरम् ॥ ५४८ ॥

संजीविताः समाः सत्यो, मत्कुक्षिर्नैव लज्जिता । आजन्म प्रमुखं यस्या,--विज्ञानं सर्वतोमुखम् ॥ ५४९ ॥

ततश्चचाल कुमरः, प्राप्तः कनकपत्तनम् । प्राविविशन्महः पूर्वं, तं ऋद्ध या कनकेश्वरः ॥ ५५० ॥

तदा पौरजनाः सर्वे, मिथो जल्पन्ति वीक्ष्य तौ । हं हो ! सिंहो ध्रुवं सिंह,--विक्रमे विक्रमाधिकः ॥ ५५१ ॥

सैषा कमलवत्याख्या, यद्वियोगानलार्दितः । रणसिंहश्चितां चक्रे, सुमृपुश्चटितस्तदा ॥ ५५२ ॥

या गेया यमराजस्य, पार्श्वे निःसमशीलतः । प्रभावादद्भुताश्चर्य,--रूपा दानवदैवतैः ॥ ५५३ ॥

इति स्तुतीर्निशृण्वन्त्यस्त्यक्तारम्भा गृहाद् गृहात् । तामुद्वीक्षितुमाजग्मुः, कामिन्यः कामविह्वलाः ॥ ५५४ ॥

काश्चिदर्पणभूषण,--नेपथ्यव्यग्रपाणयः । काश्चन करात्रकेशाः, काश्चित्कज्जलभृत्कराः ॥ ५५५ ॥

रङ्गितार्द्रांघ्रयः काश्चि,--दर्द्धं मुक्ता हि काश्चन । स्वपुत्रान् स्वपतीन् दुग्धं, त्यक्त्वा धावन्ति काश्चन ॥५५६॥

ततः पत्न्या समं सौख्यं, भुनक्ति विषयात्मकम् । गीतशास्त्रकलाविद्या,--विनोदैर्वचनातिगैः ॥ ५५७ ॥

अन्यदा विजयपुर,--सन्ने श्रीपार्श्वमन्दिरे । श्रीसिंहः कारयामास, विशिष्टाष्टाहिकोत्सवम् ॥ ५५८ ॥

कर्पूरपूरैर्मृगनाभिमिश्रैः, कृष्णागुरूत्कृष्ट--तुरुष्कधूपैः ।
मन्दारपुष्पप्रकरैः सुगन्धै,--रर्चां चकाराभयदप्रभूणाम् ॥ ५५९ ॥

तद्भक्तिभङ्गी सन्तुष्टः, प्रत्यक्षीभूय यक्षराट् । आख्यातिस्वपितू राज्य,--मङ्गीकुरु महाबल! ॥ ५६० ॥
मयि गोप्तरि सत्यन्यः, को राज्यमधितिष्ठति । विजयसेनभूपस्य, गरीयो विक्रमावधेः ॥ ५६१ ॥
तद्वाचाऽनन्तरं सिंहो, नत्वा पार्श्वपदाम्बुजम् । संप्राप्तो विजयपुरं, सबलः स दलान्वितः ॥ ५६२ ॥
सन्मुखागमनासक्तः, पुरेशोऽल्पपरिच्छदः । कोट्टद्वारं संनिरुध्य, तस्थौ सिंहोऽपि तत्र हि ॥ ५६३ ॥
कृतान्ततृणकाष्ठाम्भो,--निरोधो रोधदुर्धरः । सिंहः सिंह इवाजेय,--विक्रमोऽभून्महीप्रभोः ॥ ५६४ ॥
ढौकेषु जायमानेषु, वासरं वासरं प्रति । यन्त्रवाहनढिकुल्या,--गोलकोत्क्षेपणेषु च ॥ ५६५ ॥
पतितेषु च कोट्टेषु, चीयमानासु खण्डिषु । मुञ्चत्सु बाणपुञ्जेषु, वाहयत्सुहवायकाः ॥ ५६६ ॥
एवं वीरेषु कुर्वत्सु, मासैको व्यतिचक्रमे । न पुनर्वैरिणां नाशो, नो ग्रामश्च मनागपि ॥ ५६७ ॥
सांनिध्यकारियक्षेण, शत्रुसेनासु दर्शितम् । शुच्यमेघं नभालम्बि,--ध्वान्तमञ्जनसंनिभम् ॥ ५६८ ॥
तदवेक्ष्य क्षमानाथः, प्रत्यर्थी सपरिच्छदः । भीतो गद्गदवाक् कम्प्र,--देहो नंष्ट्वा गतः क्वचित् ॥ ५६९ ॥

शीघ्रं प्रविष्टः कोट्टे पु, तुष्टोऽथ रणसिंहराट् । दानवानां जयं कृत्वा, सुत्रामेव स्वर्गाविशत् ॥ ५७० ॥

गामल्लमण्डलाधीशं,--विजयसेनस्य भूपतेः । पट्टेऽभिषिक्तः श्रीपाण्डोः, पट्टे यद्वद् युधिष्ठिरः ॥ ५७१ ॥

आज्ञामार्गप्रतेजस्कः, न्यायवल्ल्येकमण्डपः । आचार्द्धि वर्त्तयामास, शासनं दुष्टशासनम् ॥ ५७२ ॥

दुर्जनजनसंसर्गं, त्यजतितरां सज्जनस्य संसर्गम् । कुरुते करुणासागर,--सप्तव्यसनोज्झितः सिंहः ॥ ५७३ ॥

पूजां श्रीयक्षराजस्य, यात्रां च महिमां तथा । प्रकटीचकार लोकेषु, कृतज्ञः श्रीनरेश्वरः ॥ ५७४ ॥

अष्टाहिता अष्टदिनादि यावद्, अष्टाहिकाः पार्श्वजिनालये सः ।

प्रावर्त्तयत्पुण्यतराः प्रभूत,--मेतन्मयाऽत्र फलमव्ययाग्यम् ॥ ५७५ ॥

अथैकदा पुरासन्न,--ग्रामादर्जुननामकः । कौटुम्बिकः समागच्छन्, क्षुधोदन्या प्रपीडितः ॥ ५७६ ॥

पुष्पितं फलितंस्वच्छं, वृक्षं ), वीक्ष्य हृष्टोऽभवत्पथि । गवेषितोऽपि तत्स्वामी नो दृष्टो निकटे क्वचित् ॥ ५७७ ॥

ततो द्विगुणितं मूल्यं, मुक्त्वा तत्रैव तेन हि । स्वकर्कटं चिर्भटं क्षिप्तं, दर्शनात्क्षुत्प्रणोदकम् ॥ ५७८ ॥

भक्षयिष्ये पुरं गत्वा, विचिन्त्येदं ततोऽचलत् । तावच्छ्रेष्ठीशपुत्रस्य, चिच्छेद केनचिच्छिरः ॥ ५७९ ॥

निन्ये तत्रान्यतः शेषं, संवरं तत्र संस्थितम् । ददृशे परितः पौरै,—र्हाहारवोऽभवन्महान् ॥ ५८० ॥
उत्क्षिप्ततीक्ष्ण खड्गौघैः, पुराध्यक्षैर्दधाविरे । अर्जुनस्तत्र तत्पश्यन्, दुर्जनैरिव तैर्धृतः ॥ ५८१ ॥
प्रोक्तं किमस्ति त्वत्काण्डे, इत्युवाच सचिर्भटम् । किमेतारौ धिगीधारा, यावदेत्रमितस्ततः ॥ ५८२ ॥
प्रलोकयन्ति ते तावद्, दृष्टं तत्सुतमस्तकम् । ततो बद्ध्वार्जुनो नीतो,ऽमात्यान्ते यमसंनिभे ॥ ५८३ ॥
तैरूचे किमरे दुष्ट !, रे पापिष्ठशिरोमणे ! । बालो निरपराधोऽयं, प्रापितो हीदृशीं दशाम् ॥ ५८४ ॥
अर्जुनः प्राह भो मन्त्रिन् !, न जानेऽहं किमप्यहो ! । घटते च पुना राजा, पृष्टोऽपि तदुवाच सः ॥ ५८५ ॥

राजा—

घटते घटते रे रे !, किं जल्पसि पुनः पुनः । व्यक्तं प्रश्नोत्तरं किं नो, वक्ति रे पारमार्थिकम् ॥ ५८६ ॥
अर्जुनो वक्ति भो राज,-न्नीदृशीं विदशां गते । सत्यभाषिणि लोकेऽपि, भवेत्कः प्रत्ययस्तव ॥ ५८७ ॥
जनाननात्ततस्तस्य, ज्ञात्वाशीलं च भूभुजा । मुक्तः सम्प्रति यद्भाव्यं, न जाने कर्मणः फलम् ॥ ५८८ ॥
ततस्त्वारक्षमुख्येन, लपितं दुष्ट! धृष्ट! रे ? । पाणिसंस्थितसद्यस्क,-कर्त्तितोत्तमविग्रहः ॥ ५८९ ॥

मूढ! जल्पसि किं चैव,--मनृतं मृत्युदायकम् । लोकद्वयविरुद्धं च, दुर्गत्यध्वनि दीपकम् ॥ ५९० ॥
राज्ञाऽऽदिष्टस्तलारोऽथ, वध्यभूमौ तमर्जुनम् । सर्वाङ्गकृतवध्याभं, शूलोपान्तं निनाय तम् ॥ ५९१ ॥
तावता तत्र कोऽप्येको, विकरालोऽतिकालरुक् । दारुणः पुरुषोऽकस्मा,-दुपतस्थे भयानकः ॥ ५९२ ॥
तेनोचे भोः पुरीरक्षायद्येनं मारयिष्यथ । सकलानपि रे युष्मान्, मारयिष्याम्यहं तदा ॥ ५९३ ॥
उक्तिप्रत्युक्तितस्तेषां, संजातः सत्यसङ्गरः । एकेनैव जिताः सर्वे, विष्णुनेव सुरारयः ॥ ५९४ ॥
ततः प्रणश्य भूपाला,--राज्ञः शरणमागताः । सिंहेशं कथयामासु,--र्वीतवृत्तान्तमादितः ॥ ५९५ ॥
श्रुत्वा क्रोधारुणो राजा, भृकुटी भीषणाननः । सर्वां युद्धादिसामग्रीं, विधाय निरगात्पुरात् ॥ ५९६ ॥
ततः सर्वाभिसारेण, युध्यमानस्य भूपतेः । तेन सार्द्धं समगात्कालो, भूयिष्ठः शिष्टनीतितः ॥ ५९७ ॥
कुन्तासिबाणनाराच,--चक्रकोदण्डतोमराः । सल्लक्ष्या अपि निर्लक्ष्याः, संजज्ञुस्तं प्रति प्रभोः! ॥ ५९८ ॥
ततः श्रीरणसिंहेन, ज्ञातं नैष पुमानहो! । देवो वा दानवो वाऽपि, यक्षो वा राक्षसोऽथवा ॥ ५९९ ॥
गन्धाढ्यधूपहस्तेन, भूपेनाभाणि सुन्दर! । अज्ञातपरमार्थस्य, दोषो, मे नात्र कश्चन ॥ ६०० ॥

यः कश्चिदस्ति भो ह्यत्र, प्रत्यक्षीभूय तत्त्वतः । कथ्यतां निजमाह्वानं, सन्देहध्वान्तभास्करम् ॥ ६०१ ॥

नम्राङ्गीभूय तेनोचे, शृणु तावन्नरोत्तम ! । स्वविक्रमेण विश्वेऽस्मिन्,- त्वजेयोऽहं पुनर्हरेः ॥ ६०२ ॥

नाम्नाऽहं दुष्षमाकालः, कलिं प्राहुर्जना मम । साम्राज्यं भारते क्षेत्रे, एकच्छत्रं च सम्प्रति ॥ ६०३ ॥

प्रागासीच्छ्री महावीरे, महावीरे मम द्विषन् । पक्षैरेकोननवत्या, सिद्धिं प्राप्तस्य तस्य हि ॥ ६०४ ॥

साम्प्रतं जयति राज्यमजय्यं, मामकीनमिह भारतवर्षे ।
शिक्षतोऽस्खलिततेजसा मया, कर्षको ह्ययमतीवनीतिमान् ॥ ६०५ ॥

मदाज्ञालङ्घनोन्मत्त,-श्चिर्भटं यत्तदाऽग्रहीत् । विमृश्य मूल्यशून्येऽस्मिन्, कच्छे द्विगुणितं तदा ॥ ६०६ ॥

मम त्वं पश्यतोहर्त्ता, प्रतिभासि यदीदृशम् । कृतवानित्युदित्वाऽथ, क्रोडे चिर्भटमीक्षितम् ॥ ६०७ ॥

यावत्पौरा राजलोकाः, पश्यन्तः सन्ति तावता । उत्थाय श्रेष्ठिसूः सोऽपि, प्रागान्मज्जशिरा गृहान् ॥ ६०८ ॥

वयस्यैः स्वजनैः पौरैः,—राश्चर्यं वीक्ष्य विस्मितैः । हृष्टेन भूभुजाऽप्येषः स्वाङ्कमारोप्य संस्तुतः ॥ ६०९ ॥

अर्जुनस्यापि भूपेन, सर्वालङ्कारदानतः । प्रसादो विहितो न्याय,-सारेण प्राप्तकीर्त्तिना ॥ ६१० ॥

विश्वाध्यक्षमथोवाच, कलिकालनराधिपः । ऊर्ध्वीकृत्य स्वदोर्दण्डं, स्वौजः स्फूर्तिपराक्रमान् ॥ ६११ ॥

तद्यथा—( हरिणीप्लुतं छन्दः )

अनृतपटुता चौर्यं, चित्तं सतामपमानता, मतिरविनयो धर्मे, शाठ्यं गुरुष्वपि वञ्चना ।

ललितमधुरा वाक् प्रत्यक्षं परोक्षविघातिनी, कलियुगमहाराजस्यैताः स्फुरन्ति विभूतयः ॥ ६१२ ॥

शाकिनीमन्त्रतुल्योऽसौ, व्यवहारः कलौ युगे । तरन्त्यसाधवो यत्र, निमज्जन्ति च साधवः ॥ ६१३ ॥

ये कुर्वन्ति जनाः प्रियाणि सततं सर्वस्य हेतुं विना, ते निष्कारणबान्धवा विरलतां जाताः कलौ साधवः ।

क्षुद्रैः स्वार्थपरैरपेतसुकृतैर्मायाविभिर्निष्ठुरैः, प्राण्युद्वेगविधातृभिः खलजनैर्व्याप्तं जगत्सांप्रतम् ॥ ६१४ ॥

न देवे देवत्वं कपटपटवस्तापसजनाः, जनो मिथ्याभाषी विरलतर वृष्टिर्जलधरः ।

प्रसङ्गो नीचानामवनिपतयो दुष्टमतयः, जनाः शिष्टा नष्टा अहह ! कलिकालव्यतिकरः ॥ ६१५ ॥

धर्मः पर्वगतस्तपः कपटितं सत्यं च दूरे गतं, पृथ्वी मन्दफला नृपाः सुकुटिला द्रव्यार्जने व्यसना ।

लोकः स्त्रीवशतः स्त्रियोऽतिचपला लोभैकमज्जा द्विजाः,

माधुः सीदति दुर्जनः प्रभवति प्रायः प्रविष्टःकलिः ॥६१६॥

सर्वत्राद्रुतकन्दला वसुमती वृद्धिर्जडाना परा, जातं निःकमल जगत्सुमलिनैर्लब्धा घनैस्न्नतिः ।

सर्पन्ति प्रतिमन्दिरं द्विरमनाः संत्यक्तमार्गो जनो,--वर्षाणां च कलेश्च संप्रति जयन्येकैवर ाज्यस्थितिः ॥६१७॥

इत्यादि ।

एवं तावन्निजां स्फूर्त्तिं, सौवराज्यस्थितिं तथा । प्रकाश्य रणसिंहस्य, भूपस्य पुरतः पुनः ॥ ६१८ ॥

स्तोकमात्राऽपि मे आज्ञा,--ऽतिक्रमो मा करिष्यसि । इत्युदित्वा छलित्वाऽथ, कलिभूपस्तिरोदधे ॥ ६१९ ॥

कलिनोक्तं वचश्चित्ते, धारं-धारं धराधिपः । यथागतोऽर्जुनो लोकाः, सर्वे स्वस्थानमाश्रिताः ॥ ६२० ॥

न कोऽपि तल्लङ्घयितुं, क्षमापीठे क्षमोऽस्ति भोः ! । देवो विद्याधरो वाऽपि, दानवो मानवोऽथवा ॥ ६२१ ॥

ततो भूवल्लभो नीतौ, विपरीतमना अभूत् । राज्यं प्रपालयामास, पैत्र्यं पूर्ववदुल्कटम् ॥ ६२२ ॥

खलन्ति पिशुनास्तस्य, शासनं यमशासनम् । नीचानां दुर्वचोबाणा,--लगन्ति श्रवणे प्रभोः ! ॥ ६२३ ॥

तदादि निखिलो लोको,--ऽध्येतुं प्रवृत्ते त्विदम् । कुम्भवन्मर्त्यवृत्तोऽपि, विदग्धो रागवानपि ॥
ग्रहीतुं शक्यते केन, पार्थिवः कर्णदुर्बलः ॥ ६२४ ॥ षट्पदः श्लोकः

अविवेकिनि भूपाले, करोत्याशां समृद्धये । योजनानां शतं गन्तुं, करोत्याशां समृद्धये ॥ ६२५ ॥

ततो राजसु पौरेषु, कलिराजविजृम्भितम् । दृष्ट्वा भूमीभुजश्चित्तं विरक्तमभवद् भवात् ॥ ६२६ ॥

ततश्च समयं ज्ञात्वा, समागाद् गोपमातुलः । श्रीमज्जिनदासगणि,--महामुनिशिरोमणिः ॥ ६२७ ॥

श्रीविजयपुरोद्याने, स्थण्डिले स्थावरत्रसैः । जन्तुभिर्वर्जिते सोऽस्था,--दनुज्ञाप्य स्थिराशयः ॥ ६२८ ॥

इतश्चोद्यानपालेन, विज्ञप्तो भूपतिस्तदा । देवाद्यजिनदासर्षि,--रुद्याने समवासरत् ॥ ६२९ ॥

प्रीतिं प्राप्तेन भूपेन, तस्मै दानमदायि च । विमुच्य राजचिह्नान्य,--लङ्कारांश्च धनानि च ॥ ६३० ॥

ततश्च सपरीवारो, राजपौर जनान्वितः । दशार्णभद्रवद्वीरं, वन्दितुं तं धराधवः ॥ ६३१ ॥

प्रतस्थे परयाभक्त्या,--ऽद्वितीयद्र्या पराऽऽभया । दानादिकं वितन्वानः, प्रापोद्यानं मनोरमम् ॥ ६३२ ॥

तं त्रिःप्रदक्षिणीकृत्य, पञ्चाभिगमपूर्वकम् । निषसाद यथास्थानं, नृपस्तद्वक्त्रदत्तदृक् ॥ ६३३ ॥

राजरङ्क समोरस्क,--स्तृणस्त्रैणसमानधोः । मुनिर्धर्माशिषाऽऽसंश्या,--ऽऽरब्धवान् धर्मदेशनाम् ॥ ६३४ ॥

तथाहि—

अस्मिन्नसारे संसारे, भविनां भ्रमतां मिथः । युग्मजानामपि प्रायः, सुखदुःखोदयः पृथक् ॥ ६३५ ॥

सुखसाधनं हि सुकृतं, दुष्कृतं दुःखसाधनम् । विभाव्येदं सुखाकाङ्क्षी, प्राणी धर्मं समाचरेत् ॥ ६३६ ॥

समये समये प्राणी, भावेन येन येन हि । प्रवेशं कुरुते तेन, तेन बन्धः शुभाशुभः ॥ ६३७ ॥

आश्रवद्वाररोधेन, शुभं कर्मार्जयेज्जनः । अशुभं वैपरीत्येन, इति प्रोक्तं जिनागमे ॥ ६३८ ॥

प्राणिहिंसा--मृषावादा,--ऽदत्ताऽ-ब्रह्म-परिग्रहाः । पञ्चैते आश्रवा ज्ञेयाः, स्थगितव्याः प्रबन्धतः ॥ ६३९ ॥

प्रवाहैः पूर्यते जीव,--सरसी पापवारिभिः । स्थगितेष्वेतेषु तदा--ऽनागमः प्राक्तनक्षयः ॥ ६४० ॥

वत्स ! एषोऽस्त्यभिप्राय,--स्तव चेतसि वर्त्तते । आश्रवद्वाररोधेन, पापं पुण्यं विपर्ययात् ॥ ६४१ ॥

तद् ष्कलिपिशाचेन, छलितश्छगितोऽथवा । किं वा दुर्मित्रसंसर्गा,--न्मन्ये चित्तं चलाचलम् ॥ ६ २ ॥

श्वेतं वस्तु समं पीतं, विपर्यासेन पश्यति । यथा कनकबीजस्य, भक्षणान्मानवो भृशम् ॥ ६४३ ॥

यद्वा तिमिरदोषेण, दृष्टश्चन्द्रमसो युगम्। दरिदृष्टिं तथा वत्स!, तवास्ते धीविपर्ययः ॥ ६४४ ॥
एवं कलिभूपभिया, स्वार्थं चेत्त्वं त्यजिष्यसि। तथापि स्यादयं मृत्यु, द्वयमप्यवितर्कितम् ॥ ६४५ ॥
क्रीडया क्रियमाणाऽपि, हिंसा दुर्गतिदायिनी। प्राणनाशकरं क्ष्वेडं, यथात्तं खाद्यमिश्रितम् ॥ ६४६ ॥
इत्याद्युपदेशसुधां, पायं-पायं श्रवःपुटैः। मिथ्याविषं तदा नेशे, रणसिंहमहीक्षितुः ॥ ६४७ ॥
विज्ञाय धर्माभिमुखं, भूपतिं मुनिर्नोदितम्। पितुर्विजयसेनर्षे,-र्वचांसि शृणु तत्परः ॥ ६४८ ॥
कलिविद्धं पिणा तेन, प्राप्तेन स्वगुणादथ। धर्मदासाभिधानेन, जगज्जनहितैषिणा ॥ ६४९ ॥
स्वर्गं यियासुना पुत्र,-प्रतिबोधनहेतुतः। चक्रेऽनागतमेव श्री,-उपदेशस्य मालिका ॥ ६५० ॥

**तद्वर्णिकामात्रं यथा—**

भद्दो विणीयविणओ, पढमगणहरो समत्तसुयनाणी। जाणंतोवि तमत्थं, विम्हिय हियओ सुणइ सव्वं ॥ ६५१ ॥
जं आणवेइ राया, पइयओ तं सिरेण इच्छंति। इय गुरुजणमुहभणियं, कयंजलिउडेहिं सोयव्वं ॥ ६५२ ॥
जो कुणइ अप्पमाणं, गुरुवयणं न लएइ उवएसं। सो पच्छा तह सोयइ, जह महापीढ पीढरिसी ॥ ६५३ ॥

जो गिण्हइ गुरुवयणं, भन्नंतं भावओ विसुद्धमणो । ओसहमिव पिज्जंतं, तं तस्स सुहावहं होइ ॥ ६५४ ॥

अभिगमणवंदणनमं,--सणेण पडिपुच्छणेण साहूणं । चिरसंचियंपि कम्मं, खणेण विरलत्तणमुवेइ ॥ ६५५ ॥

भवसयसहस्सदुलहे, जाइजरामरणसागरुत्तारे । जिणवयणंमि गुणायर !, खणमवि मा काहिसि पमायं ॥ ६५६ ॥

विजया गणिनी राज्ञो, माता तत्राजगाम सा । समयज्ञायतो द्वेधा, महामत्याः शिरोमणिः ॥ ६५७ ॥

आहोपदेशमालैषा, प्रस्तावं प्राप्य तं प्रति । अध्येतव्या त्वया वत्सा,--ऽऽमूलात्स्वर्गशिवर्द्धये ॥ ६५८ ॥

ततः सिंहेन साऽधीता, जिनदाससमर्पितः । भाविभद्रवतां नृणां, दुष्करं किं नु धीमताम् ॥ ६५९ ॥

पौनःपुन्येन तस्याश्च, परावर्त्तनतस्ततः । नव्योपदेशपीयूष,--भावितात्मा नृपोऽभवत् ॥ ६६० ॥

ततः कमलवत्यङ्ग,--जन्मानं शुभवासरे । राज्येऽभिषिच्य समये, विहायाहिमिव श्रियम् ॥ ६६१ ॥

श्रीमुनिचन्द्रसूरीणां, पार्श्वे जग्राह संयमम् । प्रपाल्य निरतीचारं, प्रक्षाल्य निजकश्मलम् ॥ ६६२ ॥

आराधनां समाराध्य, ध्यानमौनसमन्वितः । स्वर्गलोकेषु देवत्वं, संप्राप्य क्रमतः शिवम् ॥ ६६३ ॥

देवीकमलवत्यङ्ग,--प्रसूतेना प्यपाठि सा । तदुक्तार्थसुधासेक,--संप्रीणन्नन्तरात्मना ॥ ६६४ ॥

ततः परं चतुर्वर्ण,-- सङ्घं नानघचेतसा । पापठ्यमाना सद्बुद्ध या प्राप्तेयं तमनेहसम् ॥ ६६५ ॥

यावच्चन्द्रदिवानाथौ, दीव्यन्तौ दिवि निष्ठतः । यावन्मेरुस्तावदेषा, जयताज्जगतीतले ॥ ६६६ ॥

## । अथ प्रशस्तिः ।

तीर्थे श्रीवर्द्धमानस्य सुधर्मा गणपोऽभवत । तदन्वये वज्रकायो, वज्रस्वाम्यभवद्गुरुः ॥ ६६७ ॥

चान्द्रे कुले तच्छाखाया, सूरिरुद्योतनाभिधः । तत्पट्टे श्रीवर्द्धमानो वर्द्धमानमुनीश्वरः ॥ ६६८ ॥

खरतरेति संप्राप्त,--विरुदो नृपपर्षदि । श्रीजिनेश्वर सूरीन्द्रो -ऽभयदेव गुरुस्ततः ॥ ६६९ ॥

बोधिताचण्डचामुण्डः, सूरि श्रीजिनवल्लभः । नताखिलामर्त्यमर्त्यः श्रीजिनदत्त सूरिराट् ॥ ६७० ॥

भालस्थलोद्यन्नृमणिः, श्रीजिनचन्द्रसूरिराट् । षट्त्रिंशद्वादजेताऽभू,--ज्जिनपत्तियतीश्वरः ॥ ६७१ ॥

तद्वंशे विश्वविख्यातः, सार्वसिद्धान्तपारगः । संख्यातीतगुणग्रामः, गौतमप्रतिमः प्रभुः ॥ ६७२ ॥

आदेयवचनो भूभृद्वन्द्यः सूरिशिरोमणि । श्रीजिनभद्रसूरीन्द्रो—ऽभवद् भद्रङ्करः सताम् ॥ ६७३ ॥

तत्पट्टोदयशैले दिनेशलीलाधरो यको जज्ञे । स श्रीजिनचन्द्रगुरुः, सतां तमःस्तोमहरण परः ॥ ६७४ ॥

तत्पट्टोद्योतकरः, खरतरगणनायकोऽधुना विजयी। श्रीजिनसमुद्रसूरिः, समुद्रवद् रत्नराशिनिधिः ॥ ६७५ ॥
ग्यासदीनसुरत्राण,— गोष्ट्यामजैत्रपत्रकाः। शिष्याः श्रीजिनभद्राणां, सिद्धान्तरुचिवाचकाः ॥ ६७६ ॥
तदन्तेवासिलेशेन, रणसिंहकथाग्रथा। गणिनामुनिसोमेन, चिरन्तनकथानुगा ॥ ६७७ ॥
वाचनाचार्यवर्यस्य हेमध्वजगणेर्गुरोः। अभ्यर्थनाविशेषेण, चक्रेमुक्तिनिबन्धना ॥ ६७८ ॥
मतिमान्द्यादिहासत्यं, लक्षणाच्छन्दसोऽतिगम्। सद्भिः शोध्यं बुद्धिमद्भि,— स्तत्कृत्वा मय्यनुग्रहम् ॥ ६७९ ॥
सितपत्रस्थलदुर्गे, श्रीवीरस्वामिनः प्रसादेन। तोलाकारितशाला,— स्थितेन चैषा समर्थितराम् ॥ ६८० ॥

॥ इति श्रीरणसिंहचरित्रं समाप्तम् ॥

संवत् १५४० वर्षे श्रीवैशाखसुदि अक्षिनतृतीयादिने श्रीरणसिंहकथा कृता
वाम्मुनिसोमगणिनेति वाच्यमाना चिरं जयतात् ॥

शुभं भवतु लेखक-पाठक-व्याख्यातॄणां श्रोतॄणां चेति।

पता—

श्रीजिनदत्तसूरि, ज्ञानभण्डार

ठि० गोपीपुरा, सीतलवाडी उपासरा

मु० सुरत (गुजरात)

दि स

२१, कत्ता।

पता—

बा० हीरालालजी खारड

डायमण्ड हाउस

१३, विवेकानन्द रोड, कलकत्ता।

इति श्रीरणसिह चरित्र समाप्तम् ।